नं० ४३१२-घ

प्रश्नप्रदीपिका प्रथमाध्याय प्रथमपादः

नं० ४३१२-घ

पत्राणि १-६

4312

F. 9

ॐ कमुद्रा किनानावाकेमि पमाविधोमाग्राशिष्ठौं व सिषा। हाने त्रिरबंच बौ धापनमुं इहविजिनरले मरनें
नसधः। अयेषांमाघिन वनोमवनरनास्तेकरे सर्वदापर्वोबोजवहाडुरें द्मुनिषु क्रादवेट कोपक्रमः। १

ज्ञान ५

॥ ॥श्रीगणेशायनमः॥ ॥लक्ष्मीकौस्तुभवत्ससंभ्रमुरारिपुंशंखवासिकौमोदकीहस्तंपद्मपलाशताम्रनयनंपीतांबरं
१ शार्ङ्गिणं॥मेघश्याममुदारपीवरचतुर्बाहुप्रधानात्परंश्रीवत्सांकमनाथनाथमनंतंवंदेमुकुंदंमुदा॥१॥शबरस्वामिनं
थं नत्वाभट्टाचार्यजैमिनिं॥कुमारिलमतेनाहंकरिष्येशास्त्रदीपिकां॥२॥अथातोधर्मजिज्ञासा॥अनेनसूत्रेणाचार्येणेप्सितस्यशा
स्त्रस्यश्रोतृप्रवृत्तिसिद्धयेधर्मज्ञानप्रयोजनताकथ्यते।यदाहिधर्मजिज्ञासाकर्तव्येत्युक्त्वाशास्त्रमारभ्यमाणंदृश्यते
५ वग ध्येते नदानूनमिदंशास्त्रंधर्मप्रतिपादनप्रयोजनमित्य।विदितंतावत्प्रयोजनंसंबंधोपिशास्त्रस्यप्रस्तावहेतुर्वक्तव्यः।यथा
यधि शास्त्रान्तरेषुशिष्यप्रश्नानंतर्यादिसंबंधः शास्त्रस्यप्रयोजकोवर्णितेनतथेहापिशास्त्रारंभप्रयोजकानांसंबंधानामन्य
नमोवक्तव्यः।अनेनसंबंधेनेदंशास्त्रमायातमिति।अन्यथाह्यसंबद्धप्रलापितस्यात्।सत्यमेवंइहतुयएवायंप्रयोजने
नसहशास्त्रस्यसाध्यसाधनसंबंधःसएवशास्त्रस्यप्रस्तावकोनान्यः।भवतिहिसाधनत्वमेवार्थिनांसाधनेप्र मा ५
वृत्तिहेतुः।सत्वायंसंबंधःप्रयोजनोक्त्यैवार्थात्ज्ञायतइतिनसूत्रकारेणपृथगुक्तइत्यदोषः॥अत्रेदंचिंत्यते।किम
ध्ययनानंतरंधर्मजिज्ञासयागुरुगृहेवस्तव्यमुतगुरुगृहात्समावर्तितव्यमिति।अध्ययनानंतरंधर्मजिज्ञासुना
गुरुगृहेवस्तव्यमुतगुरुगृहात्समावर्तितव्यमिति।यदिस्वाध्यायाध्ययनविधिनाधर्ममात्रार्थमध्ययनंस्वर्गादि राम १
र्थंनविधीयतेततस्तन्मात्रेणैवशास्त्रार्थस्यसमाप्तत्वादधीत्यस्नायादितिस्मृतिबलेनसमावर्तितव्यं।अथत्वदि

त्रि ३ श १

ग्रहणपरंपरोपजायमानवाक्यार्थज्ञानार्थमध्ययनं विधीयते तत्तस्य विचारमंतरेणासंभवाद्ध्ययनविधि
नैवार्थाद्विचारोपि विहित इति गुरुगृह एवावस्थाय धर्मो विचारयितव्यः। तन्न। विना पि विधिना दृष्टलाभान्निर्
न्नर्थकता। कल्प्यस्तु विधिसामर्थ्यात्स्वर्गो विश्वजिदादिवत्। न च। विनापि विधिना दृष्टलाभान्निरर्थकता।
कल्प्यस्तु विधिसामर्थ्यात्स्वर्गो विश्वजिदादिवत्। स्वाध्यायसंस्कारद्वारेणाध्ययनस्यार्थज्ञानहेतुत्वं विनैव
विधिना प्रमाणांतरेण सिद्धमिति तदा दृष्टे विधानानर्थक्यं। न चावघातादिवन्नियमार्थत्वं अवघातो हि दर्शपूर्णमा मि ५
सोऽपूर्वे नियम्यते अवघातनिष्पन्नैरेव तंडुलैरपूर्वं सिध्यतीति न तंडुलस्वरूपप्रमाणांतरविरोधान्न तु इह
हि विज्ञानस्याध्ययनमंतरेणापि दर्शनात्तत्स्वरूपे नियमासंभवात्क्रत्वपूर्वे वाध्ययननियमो विज्ञातव्यः। अधी धे ५
तैरेव वेदैरवगतानि कर्माणि स्वफलं ददतीति। न चैवं युक्तमक्रत्वर्थत्वादध्ययनस्य। अनारभ्याधीतत्वात्क्र
त्वाद्यभावाच्च। तस्माद्दृष्टार्थमेव स्वाध्यायाध्ययनमित्यध्ययनमात्रेणैव शास्त्रार्थसमाप्ते गुरुकुलात्समाव
र्तितव्यमिति प्राप्ते अभिधीयते। लभ्यमाने तु दृष्टे अदृष्टस्य प्रकल्पना। विधेस्तु नियमार्थत्वान्नानर्थक्यं भवि
ष्यति। ज्ञानस्वरूपे क्रत्वपूर्वे वा नियमो न संभवतीति यदुक्तं तत्राभिधीयते। नाध्ययस्यापि क्रमः कर्तारं हि। योग्य

मग्निहोत्रादिष्वधीतवेदानां त्रैवर्णिकानां नानधीतवेदानां। अग्न्याधानमित्यधिकार[redacted]नियमः सप्रयोजनमध्य
२ यनविधेः। तथाहि त्रसत्यध्ययनविधावग्निहोत्रादिशास्त्राणि विद्वांसमलभमानान्यविद्वांसमेवाधिकृत्यवि
द्यामंतरेणानुष्ठानेऽसंभवाद्विद्यामाक्षिपंत्यविशेषाच्चतुरो वर्णानधिकुर्युः।। सति त्वध्ययनविधौ त्रैवर्णिकान
दे: १४ मेवविदुषामधिकारो भवति न तुरीयाणां। तथाहि वसंते ब्राह्मणमुपनयीतेत्यादिवाक्येषु द्वितीयानिर्देशादुपनयन
कि संस्कृतास्त्रैवर्णिकाः[redacted]फलस्याभिः कर्तव्यमित्यवगंते। तत्सन्निधौ वाध्ययनमनिर्दिष्टकर्तृकं विधीयमानक
र्तारमपेक्षते। तत्रापेक्षासन्निधियोगपत्त्यैवं ज्ञायते त्रैवर्णिके स्वयमनीतैरध्ययनेनाक्षरग्रहणादिपरंपरयाऽर्थज्ञा
नं कर्तव्यमिति।। एवं च फलवदध्ययनकर्तृत्वमाणवकसंस्कारत्वादुपनयनमध्ययनांगं। अध्ययनमपि दृष्टा
र्थत्वानार्थज्ञानचानुष्ठानोपयिकत्वात्प्रसिद्धफलमेवेति सर्वेषां फलवत्त्वं। एवं च त्रैवर्णिकेषु सत्सु विद्वत्सु
नाग्निहोत्रादिविधयश्चतुर्थादेर्विद्यामाक्षिपंति किंतु त्रैवर्णिकानेव विदुषोऽधिकुर्वंति। सोऽयमधिकेषु सत्सु नि राम
नाग्निहोत्रादिविधयश्चतुर्थादेर्विद्यामाक्षिपंति किंतु त्रैवर्णिकानेव विदुषोऽधिकुर्वंति। सोयमधिकारनिय २
मापश्चूद्राधिकरणे वक्ष्यमाणोऽध्ययनविधिप्रसादलभ्य इति फलवानेव विधिः। तेनार्थज्ञानावसान[redacted]मध्य

पनविधिनाविधीयत इति विचारमंतरेणानद्युपपद्येताध्ययनविधिरेव विचारमाक्षिपंस्तद्विरुद्धस्मार्त्तस्नानं वाधत इ
ति सिद्धमध्ययनानंतरं धर्मजिज्ञासा कर्त्तव्येति॥ केचित्तु पुनराचार्यकरणविधिप्रयुक्तत्वमध्ययनस्यांगीकृत्य कि
माचार्यकसिद्धिरेवाध्ययनस्य प्रयोजनं न पुनरर्थज्ञानमपीति विचार्यांतरंगत्वादर्थज्ञानमित्याहुः॥ किं पुनः कारण
माचार्यकरणविधिप्रयुक्तत्वेध्ययनस्य॥ अध्ययनविधेरधिकारश्रूयमाणत्वादाचार्यकरणविधिप्रयुक्तत्वे चात्म
लाभे विश्वजिदादिवत्कल्पनानुपपत्तेः॥ कः पुनराचार्यकरणविधिः कथं चानेनाध्ययनस्य प्रयुक्तिः॥ उच्यते॥ उप
नीय तु यः शिष्यं वेदमध्यापयेद्द्विजः॥ सकल्पं सरहस्यं च तमाचार्यं प्रचक्षते इति स्मृत्यनुमित उपनीयाध्यापनेनाचा
र्यत्वं भावयेदित्याचार्यकरणविधिः॥ अत्र चाध्यापनमाचार्यत्वसाधनं उपनयनं तु तत्क्रमप्राप्तस्यांगं॥ न च के
नद्वारेणाध्यापनस्योपकरोतीत्यपेक्षायामुपनयनेनाध्यासन्निहितद्वारमंगीक्रियते लिंगात्॥ उपनीतेन पिना किं चित्कर्म
मिति तद्व्यापाराय तत्र यामुपनयनं प्रक्रम्य विहितमध्ययनमध्यापनोपकारित्वादुपनीतस्य व्यापारत्वेनाध्यवसीय
ते॥ न चैवं स्वांगभूतमुपनयनं प्रयुंजानोध्यापनविधिस्तद्वारेणाध्यापनोपकारित्वादुपनीतस्य व्यापारत्वेनाध्यस
पनेन चैवं स्वांगभूतमुपनयनं प्रयुंजानोध्यापनविधिस्तद्वारेणाध्ययनं प्रयुंक्ते॥ तदिदमनुपपन्नं॥ तथा हि॥ नियोगार्थ
साध्ययनस्याचार्यत्वप्रयोजनतार्थज्ञानप्रयोजनता न शक्यते शास्त्रेणावोधयितुं साध्यद्वयस्यैककर्त्तृकासंभवात्॥ नियो

कि ५

ज १ प २

गार्थत्वेनवचनात्प्रमाणाबोधनेनचस्त्वर्थज्ञानार्थत्वज्ञायांत्वनुमतिमात्रमितिचेत्। तथाप्यर्थद्वयंस्यादेव। किंचैवंसकृदुच्चारि
३ तस्य लिङ्प्रत्ययस्य विध्यर्थत्वमर्थज्ञानार्थत्वंचेतिवैरूप्यमपिस्यात्॥ तेनसंशयएवानुपपन्नः। तथा सिद्धांत
स्यनुपपन्नएव। प्रमाणांतरसिद्धत्वादर्थज्ञानार्थत्वंनशास्त्रगोचरतामनुभवतीति। तत्रयदेवास्मदभिमतंविध्यर्थ
यमार्थत्वमहताप्रयत्नेनभवद्भिस्त्वादर्थज्ञानार्थत्वंनशास्त्रगोचरतामनुभवतीति। तत्रयदेवास्मदभिमतंविधेर्नियम
र्थत्वंमहताप्रयत्नेनभवद्भिर्दूषितंतदेवभवद्भिरपिविमुक्तलज्जैरनन्यगतित्वादाश्रयणीयमापन्नं। नियमानंगीकारे
हिपूर्वपक्षएवश्रेयानापद्येत। आचार्यत्वस्यादृष्टत्वेनप्रयोजनत्वोपपत्तेः। अर्थज्ञानार्थत्वेच। अध्ययनस्य [redacted]
ध्यायसंस्कारःनियमार्थत्वेतुप्रधानकर्मत्वेनवैरूप्यमपिस्यात्। अर्थांतुलानमर्थज्ञानंप्रयोजनंनशास्त्रचेत्। आ
नप चार्यत्वमपिप्रयोजनंस्यात्तस्यापूर्वार्थज्ञानत्वात्। अनिवार्येनचतज्ञानोत्कर्षानस्यात्। अशास्त्रस्वीकृतत्वादि
चारस्य। किंच। नियोगःकल्पनीयात्रविध्यर्थानुपपन्नेतः। नचापनयनस्यांगभावोस्यध्यापनंप्रति। द्वितीयाश्रुतिस
मर्थ्यात्सामाणवकसंस्क्रिया। नथासत्यंतरंगत्वादंगमध्ययनस्यतत्। यत्नावन्नियोजकत्वमध्ययनविधेरिति। न
दयुक्तं। अभावासिद्धेः। अश्रुतस्यापिविश्वजिदादिवत्कल्पनात्। कार्यंहिविध्यर्थः। संवधिशब्दस्वार्थकार्यमितिक
स्यचिद्धिकिंचित्कार्यंभवतिन [illegible] सर्वस्य। अतःकस्येदंकार्यमित्यस्तिप्रतिसंबंधाकांक्षा सावश्यमध्याहृतेनकेनचित्
श्रीभावादद्वयो ३

वर्त्तनीयम्। शास्त्रस्येदं कार्यमिति नित्यस्येदं स एव नियोज्य इत्युच्यते॥ यद्यपि कथंचित्परप्रयुक्तानुष्ठानादेवात्मलाभः स्यात्तथा
पि न तावता कार्यत्वं सिध्यति॥ नहि कृतिसाध्यतामात्रं कार्यत्वं किंतर्हि यत्कृतिसाध्यं कृतिं प्रति प्रधानभूतं तत्का
दी र्यमित्युच्यते। प्राधान्यं च कृतेस्तदुद्देशेन प्रवृत्तिः। ततश्चाध्ययननियोगेन कार्येण भवता स्वविषयपुरुषव्यापारोद्देश्ये
नि ४ न भवितव्यं। न चासति नियोज्ये तदुद्देशेन कश्चित्प्रवर्त्तेत। अध्ययनविधिना धिप्रवर्त्यमानो माणवकः कथं विरुध्य
यनमात्रमनुतिष्ठन्नत्वपूर्वमुद्दिश्य। नहि तस्य तदुद्देश्ये प्रमाणं भावात्॥ प्रयाजाद्यपूर्वाणि दर्शपूर्णमासोपका
रित्वात्तदधिकृतेन पुरुषेणाभिसंधार्थमुद्दिश्य क्रियमाणे नियुज्यंते यदसत्यपि साक्षान्नियोज्योपादाने कार्यत्वं लभंते अ
ध्ययननियोगस्य तु नान्योपाधिकं त्वं यतस्तद्रूपेणादेश्यता स्यात्॥ अर्थज्ञानस्य च विषयफलत्वेन नियोगान्वय
त्वात्। तस्मादस्य कार्यत्वसिद्धये वश्यं नियोज्यः कल्पनीयः। यद्वाध्यापनविधेरुपनयनद्वारमध्ययनं प्रयोजकत्व
मुक्तं तस्याप्युक्तं उपनयनं प्रयुक्तेरवर्त्तिद्वारेणाध्ययनप्रयुक्तिरूपायेत। स्वाध्यायेन हि समानकर्तृकत्वमेवोच्यते न
न चैकप्रयोगता कल्प्यते अग्नाभिभावस्त्वेकप्रयोगताव[illegible]शात्कल्प्यः। द्वितीययानुसान्नाद्येगित्वमेवोच्यते अन्ने
पयाज्ञिच्छ्ताद्यूपपरिव्याणं यूपार्थं नोपाकरणार्थं एवमुपनयनमपि माणवकसंस्कारार्थं नाध्यापनार्थं। स्मृतिगतस्त्व
ध्यापयः प्रत्यक्षवेदगतानुवर्त्तनं ब्राह्मणमिति द्वितीयास्त्रतोपि माणवकार्थत्वं। भवतु माणवकसंस्कारस्तथा

मंता

रेणाध्यापनं मध्ययनांगमितिवेत्॥ मैवं। अंतरंगत्वादध्ययनस्य तादर्थ्यमेव संस्कारस्य युक्तं। अध्ययनमपिफल
४ वदध्यापनमपि॥ तयोः कस्यायं माणवकसंस्कारांगं भवतीति चिंतायामध्यापनस्य पुरुषांतरगामित्वेन बहि
रंगत्वान्माणवकगताध्ययनीयत्वमेव युक्तं। यद्येवमध्ययनस्याचार्यसिद्धिश्रेयोजननामन्त्रस्य वेदमधीत्य स्नायादि
तिस्मृतिविधित्वात् अंतरंगत्वादर्थज्ञानार्थत्वेनैवाश्रीयते तत्त्वेयोपनयनस्याध्ययनार्थता वेदितव्या॥ स्मरणादपि पाणि
नीयादध्ययनांगत्वेनैवोपनयनस्यावगम्यते। अध्ययनांगत्वं हि स्मरन्नाचार्यकरणे नयतेरात्मनेपदं विदध्यात्। अध्यापनांग
त्वे हि कर्त्रभिप्रायमत्वात्क्रियाफलस्य [illegible]त्वादेवात्मनेपदं सिध्येत्॥ उपनीय तु यः शिष्यमिति तिक्त्वाप्रत्ययो हि कथं विद
शेषणं मासि[illegible]तिच्च दसत्यध्ययनांगत्वे माणवकस्यैतत्पूर्वविधानं त्वाध्यात्मनेपदस्यात्यन्तानर्थकं। [illegible]
[illegible] तस्मात्॥ नन्वन्यः संस्कारो हि माणवकसमवायी॥ [illegible]माणवकसमवेतोऽपि न तस्यार्थः॥ कर्त्रर्थत्वं च
फलस्य कर्त्रभिप्रायत्वं न तु न तत्समवायः॥ अन्यथा ह्याधानादधीतेत्यात्मनेपदं न स्यात्॥ आधानफलस्याहवनीयत्वा
दग्निसमवेतत्वे कर्तृसमवायाभावात्॥ उ यच्च स्मृतिरुपनीय तु यः शिष्यमिति निश्रुतो बलीयसी द्वितीया श्रुतिः॥ तस्मा
त्रोपनयनमध्यापनांगमिति न तद्द्वारेणाध्ययनस्य प्रयुक्तिः॥ यज्ञोपवीतमपारापेक्षायामुपनयनं प्रक्रम्य विहितम राम
ध्ययनमध्यापनोपकारित्वात्तथापारत्वेनाध्यवसीयत इति तस्य बुद्धिपूर्वकं। एवं हि वदताध्यायनांगमध्ययमित्युक्तं भ ४

नै

वत्ति। यदा ह्यध्यायनार्थत्वेनोपनीयमानस्य माणवकस्य तदुपयोगिव्यापारापेक्षायामध्ययनविधिरेवाध्ययनं तदुपयो।
गिव्यापारतया विधत्ते त्रैवर्णिके रुपनीतैरध्यापनौपयिकव्यापारापेक्षैरध्ययनव्यापारः कर्त्तव्य इति। तदापि स्प
मेवाध्यापनशेषमध्ययनमिति दूरनिरस्तमर्थज्ञानार्थत्वमिति मितिस्तु निरूपितो वाक्यार्थः। अथाध्ययनविधिरर्थ
ज्ञानार्थतयैव विधत्ते नाध्यायनोपरिकतया ततोऽस्याध्यापनस्य तदौपयिकत्वं केन प्रमाणेनावगम्यते। न ह्यत्र प्र
त्यादीनि क्रमन्ते। सन्निधानादिति चेत्। न सन्निधानं नाम स्वयं प्रमाणम्। शब्दस्य त्वर्थप्रतिपादयतः सन्निधापेक्षा
योगपत्ता इति कर्त्तव्यता नैतस्य वोन्मीलनदि। शब्दस्तु रध्यापनौपयिकतया ध्ययनं विदध्यात्तत्रार्थज्ञानार्थता सिध्येत्
अर्थज्ञानार्थतया विधानेऽध्यापनौपयिकता न सिध्येत्। अतो नोपनयनसन्निधोऽस्याध्याय अतः स्मृती विहितस्याध्या
पनयनद्वाराध्यायनविधिनाप्रयुक्तिः। यदि परमध्यापनस्याध्ययनमन्तरेणासंभवात्परार्थस्वभावेनाध्ययनमाक्षि
प्येत तथा सत्यविहितेनैव लौकिकेनाध्ययनेन तत्संभवान्न विहितस्याध्यापनस्य नियोगतस्तत्प्रयुक्तिः। न च प्रयुक्ति
ल्लाघवाद्विहितोयजीवनं तदुपजीवनेऽपि प्रयुक्तावनवलोयात्। विहितमप्यध्ययनमध्यापनविधिनैव तन्मते प्रयुज्य
तेन स्वविधिना। तस्मात्लौकिकमेवाध्ययनमुपनीतानामध्यापनविधिराक्षिपेत्र विधिविहिताध्ययनं तु परप्रयुक्त्यभा
वादधिकारं कल्पयेदेव। किंच। यद्युपनमध्यापनाङ्गं ततोऽध्ययनविधिरर्थज्ञानार्थत्वात्राध्यापनार्थतयोपनीतैस्त्रैवर्णिकैः
सवचेत्तयैध्यायनार्थतयोपनीतास्त्रैवर्णिकास्तदुपयोगिव्यापारमपेक्षन्ते तेनार्थज्ञानार्थमधीयीरन्निति स्प्रसंवद्धार्थमेव
धं

स्यात्। नतस्योपनीतैरसंबध्यमानोध्ययनविधिस्त्रैवर्णिकानामपिवर्णितान्नास्यादितिस्त्रीशूद्राधिकारप्रसंगः। तस्मादुपनीतानां
५ प्रयोजनापेक्षिणामध्ययनकरणिकार्थभावनाविधीयतइत्यध्ययनागमेवोध्ययनयत्ने। प्रयच्चेनार्यपक्षोन्मायरत्नम
ल। यामेवनिरस्तइत्युपरम्यते। तस्मात्पूर्वोक्तएवविचारः किमदृष्टार्थमध्ययनमुताक्षरग्रहणादिपरंपरयार्थज्ञानार्थ
मितिसंशयः। नात्रकिंचिद्विचार्यतेनावभिकन्यायेनैवाध्ययनस्याक्षरसंस्कारादिपरंपरयार्थज्ञानार्थत्वसिद्धेः।
नवमेहिसाभ्राभृगजराभिव्यक्तिद्वारेणस्तुत्युपयोगित्वदर्शनात्तादर्थ्यमेवनादृष्टार्थत्वमितिवक्ष्यतेतेनैवन्यायेनोध्य
यनस्यार्थज्ञानार्थत्वसिद्धेरध्ययनानन्तरधर्मोऽत्रविषयवक्तुंमीमांसायाःप्रयोजनमिति। नन्वत्रकस्यचिद्वेदवाक्य
स्यार्थोधिवार्यते। तदाहनचात्रचोदनाव्याख्येति। तत्सिद्धमध्ययनानन्तरंधर्मजिज्ञासाकर्तव्येति॥ सावत्तुर्विधाध
र्मस्वरूपप्रमाणसाधनफलैः॥ नन्वध्ययनविधिनावेदवाक्यार्थविचारमात्राक्षेपाद्धर्मस्वरूपप्रमाणजिज्ञासायाः
कःप्रसंगः। उच्यते। उपोद्घाततयाह्यसंगः। यदिहिवेदवाक्यार्थोधर्मःस्यात्तदेवस्यप्रमाणंतदासौविचारःकर्तव्योभवति।
इतरथाकाकदंतवरीक्षावत्स्यात्। तदध्ययनविधिरेवप्रमाणादिविचारमप्याक्षिपति॥ धर्मग्रहणंचोपलक्षणार्थम्
धर्मस्यापिहानापिजिज्ञास्यत्वात्॥ अकारप्र—घाणादितिवासूत्रमथधर्मजिज्ञासामामपिव्याख्यायामितिनिरवद्यं॥
चोदनालक्षणोऽर्थोधर्मः॥ ॥ अथमंतावत्कोधर्मःकथंलक्षणःइतिद्वयमनेनसूत्रेणाक्रमपर्थीभयंनिरूप्यते। को राम
धर्मःस्वोदनालक्षणःचोदनैवतस्यलक्षणंप्रमाणंचोदनावतस्यलक्षणमेवनिक्षिप्तस्याप्रमाणविधावर्थोचोदनागम्यः ५
जिज्ञासाकर्तव्येतिसिद्धमेवेतावप्रयोजनविवक्षयासूत्रकारेणोच्यते। तदाहुः। धर्मो

वाग्निहोत्रादिर्धर्मो नानालक्षणश्चैवमेवं नानाचतस्य लक्षणमेवेति श्रुत्या प्रामाण्यविधावर्थवादोदनानामप्येवाभिधीयते
दिर्धर्मो नानालक्षणश्चैत्यनंदनादिरिति स्वरूपमपि सिध्यति॥ तयापश्चोदनालक्षणः स धर्म इति स्वरूपविधावर्थात्प्रमाण
सिद्धिर्वेदितव्या। कश्चित्त्वाह। कार्यरूपो वेदार्थो न सिद्धरूप इत्येतद्देनेन सूत्रेणोच्यते॥ चोदनालक्षणशब्देन कार्यमु
च्यते। धर्मशब्देन वेदार्थ इति। तदयुक्तं। यानि तावद्विधिवाक्यानि निर्दिष्टानि वाक्यानि तेषां विधावेव प्रामाण्यं वस्तुरूपेण
प्रामाण्यं विस्पष्टमेवेति न तत्र किंचिद्वक्तव्यं॥ येपि ह्यादिवाक्यानामपि विधिमतया तत्रैव प्रमाण्यं। मन्त्राणामपि प्रकरण
न प्रधानशेषत्वं द्वितीयाध्यायसप्तम इति न तत्र। पिवक्तव्यमस्ति तेन कस्मात्र सिद्धार्थता निरस्य कार्यार्थतोच्यते। आविना
शीनाम्प्ररेयमात्मेत्यादीनामुपनिषद्वाक्यानाम्। मितिचेत्। न। तेषामपि यदि विध्येकवाक्यत्वमस्ति ततोर्थवादाधिक
रणेन गतं। अथ न। स्ति कथं तेषां कार्यार्थता स्यात्। अथ तेषां विध्यश्रवणात् द्विधं तरेणैकवाक्यत्वाभावाच्च कार्या
र्थत्वानुपपत्ते — स्यत्तिविरुद्धत्व सिद्धार्थप्रामाण्यायोग्यत्वादप्रामाण्यमेवाभिमतं। किमिदानीमात्मादिवाक्यानामप्रामा
ण्यमनियादनपरा। — मिदं सूत्रं। सुव्याहृतं तर्हि शास्त्रारंभप्रत्यथ मंतावत्सूत्राकारोऽप्रामाण्यं वेदवाक्यानां प्रति
पादयतीति। कथं च कार्य एव प्रामाण्यं नत्वेव व्युत्पत्तेः। प्रवृत्त्यधीना हि व्युत्पत्तिः सा च कार्याववगमाधीनेति — स
क्तापि तत्रैव भवतीति चेत्। नावश्यं प्रवृत्त्यधीनैव व्युत्पत्तिः। काष्ठैः स्थाल्यामोदनं पचतीति वर्तमानापदेशेष्वपि प्र।

सैववा॰चेति सत्यप्यवगमे व्यभ्यंतरेऽप्रयोगं दृष्ट्वा ५

शा॰प्र॰ ६

सिद्धत्तीयार्थानामप्रसिद्धकार्यार्थानां च पुरुषाणां कार्यार्थे व्युत्पत्तिदर्शनात्॥ प्रथममव्युत्पत्तिः कार्यविषयैव नहि
नराशक्ये नरवशेन शब्दानां व्युत्पत्तिः संभवति सर्वस्याप्रसिद्धत्वादिति नात्॥ प्रथममव्युत्पत्तिः कार्यविषयैव न
हि नराशक्यं नरवशेन शब्दानां व्युत्पत्तिः संभवति सर्वस्याप्रसिद्धत्वादिति चेन्न। अस्त्वेवं तथापि पश्चात्। वक्तुराः
सिद्धार्थशब्दप्रयोगदर्शनात्कोऽपराजायां चाल्नइत्यादिषु प्रश्नप्रतिवचनादिषु कार्यस्य व्यभिचाराच्छब्दव्यभिचार्यर्थमा
त्रेवाच्यमिति सुस्तानां। यथैव हि कस्यांचिद्व्यक्तौ प्रथमं गोशब्दस्य प्रयोगं दृष्ट्वा पूर्वव्यक्तिव्यभिचाराद्व्यभिचारिसाम
न्यमेवार्थ इत्यध्यवसीयते तथा कार्यपरतामनगम्यापि पश्चात्सिद्धार्थप्रयोगदर्शनेन बाधित्वार्थमात्रमेवाव्यभि
चारित्वाद्वाच्यमिति युक्तं। किंच। प्रथममव्युत्पन्नो कतिपयानामेव शब्दानां कार्यार्थत्वमवगतं न सर्वशब्दानां अतः
पश्चाद्व्युत्पद्यमानस्य कार्यादेः सिद्धार्थव्युत्पत्तिः केन बाध्यते। न च व्युत्पत्तौ शब्दानां पौर्वापर्यनियमोऽस्ति। अतः सर्वे
शब्दाः पश्चाद्व्युत्पद्यमानाः केचित्सिद्धार्था भवंति। सर्वेषां च कार्यार्थत्वे सिद्धार्थपरेषु लोकिकवाक्येषु सर्वशब्दा
नां लक्षणिकत्वान्न कश्चिदन्विताभिधायी स्यात्। नन्वान्वितप्रतीतिः कथं सिध्येत्। वक्तृज्ञानानुमानादिति चे
र॥ नयद्विषयं हि वाक्यं न तद्विषयमेव वक्तृज्ञानमनुमानं व्यंजनचान्वितप्रतिपादकं वाक्येषु चारितं द्विविधानं न स्यात्
॥ किंच प्रथममेव कार्योव्यभिचारदृशकेयावगंतुं यदा हि पुत्रस्ते जा। तत्स्वेवमुक्तस्य कस्यचित्सुखविकासं पार्श्वस्थः रा॰ ६

6

मिति कल्पितस्तानानुमाने अप्रत्यर्थेत्य॰ स्यापेक्षा॰ यदेरायतस्तानि मुक्ता यतेतत कार्यतान्वितपि सिद्धे २२

स्यन्नितदाहर्षहेतुरनेनशब्देनप्रतिपादितइतिहर्षहेतुभूतसिद्धार्थप्रतिपादनेशब्दस्यसामर्थ्यंकल्पयति॥ यद्यपिचत्त
दानीमर्थविशेषोनज्ञापतेहर्षहेतूनांबहूनांसंभवात्तथापिसिद्धार्थतातावदवगता॥ नावतानाचकार्यंचाभिवा
रःसिद्धिः॥ किंचबहुशःपुत्रजननेसत्येवंविधशब्दप्रयोगादन्येषुहर्षहेतुषुप्रयोगात्पुत्रजन्मरूपार्थविशेषोपिबु
ज्ञानएव॥ किंचप्रवृत्तबुद्धीनामपिव्युत्पत्तिर्नावश्यंकार्यविषयेवभवति॥ तथाहियदाकश्चित्प्रवृत्तावसंततासमर्थ।
वृद्धमातुरंवाप्रतिविनोदार्थंवाक्यंप्रयुंक्ते॥ नद्यास्तीरेफलानिसंतीति॥ तत्रान्योदेवसंगतःकश्चिदेनद्वाक्यमर्थो
क्त्वानदीतीरंगत्वाफलानिहरतिएतत्सर्वपश्यन्नन्योव्युत्पित्सुःफलसद्भावप्रतिपादनेशब्दस्यसामर्थ्यंबुध्यते
॥ तस्मान्नैकांततःकार्यार्थतानाशब्दानां॥ काचास्यसूत्रस्यवचनव्यक्तिःपदितं॥ विधात्कारार्थएवेतिकार्यमुद्दिश्यवेद
र्थतानाविधीयतेतथासमुद्देश्यस्योपादेयेननियमात्सर्वस्यलौकिकस्यापिगवानयनादिकार्यस्यवेदार्थतास्यात्॥ किंचोपा
देयस्यवेदार्थस्योद्देश्येनकार्यरूपेणाश्लिष्टत्वेनाव्याप्तेरकार्येपिवेदस्यप्रामाण्यंननिरस्तंस्यात्॥ अथयोवेदार्थःसकार्य
रूपएवेति॥ ततोयोधर्मःसचोदनालक्षणइतिवचनव्यक्तिःस्यात्तत्रार्थशब्दोभ्युदयवाचीकस्यविशेषणं॥ यद्युपादेय
स्यचोदनालक्षणपदार्थस्यतदासर्वस्यवेदार्थस्यकार्यत्वमर्थत्वंचविधीतःश्येनादिनियोगानामप्यर्थत्वंस्यात्॥ अथो
देश्यवेदार्थविशेषणंततोयमर्थोभवतियोर्थः — कोभ्युदयात्मकोवेदार्थःसकार्यरूपइतिततःश्येनादिनियोगानांनि॥ — रूपफलत्वे

त्म

नानभ्युदयरूपाणां कार्यत्वानस्यात्॥ मा भूदिति चेत्॥ नेत्तेषामपि लिङ्कार्यत्वावगमात्॥ श्येनयागस्य कार्यता निवारयितुं शक्यते नियो
८ गस्य: तस्य कार्यैकस्वभावत्वात्॥ असति च कार्यत्वे श्येनादीनां कस्य कार्यत्वाभावात्सिद्धार्थत्वे च वक्तव्यास्यात्तन्न च तथा संभवतीति विधिप्र
त्ययपर्यायात्सिद्धार्थव्युत्पत्तिविरहादप्रामाण्यमेव श्येनादीनां स्यात्॥ अथ पूर्वसूत्रादिहोदाहृदर्थपरं धर्मपदमनुषज्य चोदनालक्षणो
वेदार्थ इत्येकं वाक्यमर्थो धर्म इत्यपरं वाक्यं॥ तदिदं स्वप्रज्ञाविलसित॥ अनुषंगवाक्यभेदयोर्विना फलमाश्रयणं॥ तदिदं स्वप्रज्ञाविलसित॥ अ
णात्॥ अप्रतिज्ञातस्य वधर्मस्य लक्षणमसंगतं॥ अथ प्रतिज्ञातस्यैव वेदार्थस्य कार्यत्वसिद्ध्ये धर्मत्वमुच्यते किं कार्य एव धर्मरूपो वेदार्थः स
7 र्वजिज्ञास्यो न सर्वः॥ तथा वेद्य एव जिज्ञास्यो धर्मस्तस्यैव सूत्रान्तरा विनाशेन जिज्ञासप्रजिज्ञानव्येति वेदार्थप्रतिज्ञावचनमनर्थं॥ अथ त्वर्थश
कमनाद्यपयो वेदार्थः स कार्यरूप इत्युच्यते तत्तत्तोर्थपदमनर्थकं वस्तुमात्रपर्यायमनुवादकं स्यात्॥ अनर्थव्युदासार्थं नाचास्य भाष्यकारेण म
क्त॥ तस्माद्विशेषणमेवेतत्॥ विशेषणात्येवाभ्युदयरूपस्यैव वेदार्थस्य कार्यत्वाभिधानात् अनभ्युदयरूपस्य वेदार्थस्य कार्यत्वं न स्यादिति सि
द्धस्य वेदस्य कार्य एव प्रामाण्यमिति नियमो न स्यात्॥ ततश्चाविनाशी वा अरेयमात्मेत्यादीनामात्मस्वरूपपरत्वं न निराकर्त्तुमपि
पार्यतावत्॥ तस्माद्धर्मस्वरूपप्रमाणप्रतिपादनार्थमेवेदं सूत्रं॥ नदिह धर्मं विषयीकृत्य चिंत्यते किमस्य न किं विंत्प्रमाणमस्ति किं
वा प्रत्यक्षादिकमेव प्रमाणमुत वेदेनैवाथ विकल्पोथवा समुच्चय इति॥ तत्र शब्दस्य प्रमाणान्तरप्राप्तप्रापकत्वेनैकत्वेन स्वयमप्रमा राम
णत्वात्प्रत्यक्षादीनां त्रांसामर्थ्यादप्रमाणको धर्म इत्येक पक्षः॥ प्रत्यक्षादिगम्य एवेत्यपरः॥ योगिनां प्रत्यक्षगम्यार्वाचीनानां तु चोदनाग ८
म्य इत्यपरः॥ अग्नेहेविमाथापि॥ पाकियाद्दृष्टमस्तीति सामान्येन प्रसिद्धो धर्मश्चोदनया अग्निहोत्रादिविशेषरूपेण गम्यते॥ तस्मात्समुच्चय इति पक्षः॥

नरं।।वोदनैवप्रमाणं।सावप्रमाणमेवेतिनाप्रमाणमाणाकत्वमितिसिद्धांतः।।नदिहचोदनैवप्रमाणं।साचप्रमाणमेवेसवधार
णद्वयंप्रतिज्ञायते।।निभिन्नसूत्रेतुप्रथमद्वितीयसूत्रमात्रालोचनयावेदोधर्ममूलमित्यादिवदुपदेशशास्त्रताशंकामामूदिति
परीक्षाशास्त्रमिदमितिज्ञापयितुंपरीक्षाप्रतिज्ञानं।यद्यपिचोपरित्तनव्यापारादेवपरीक्षाशास्त्रत्वंगम्यतेतथापिवक्ष्यमाणम
वद्योतवुद्धिसमाधानायकीर्त्तितं।।प्रत्यक्षसूत्रेतु [illegible] त्रेतुप्रत्यक्षविधिप्रमाणोपलंभनत्वाद्धर्मविषयेतिधर्मेप्रामाण्यासंभवात्तत्स
र्वकलेनचेतरेषामप्यप्रामाण्यान्प्रमाणान्तरनियमविकल्पसमुच्चयनिराकरणाच्चोदनैनन्यपरमर्थः।सिध्यति।औत्पत्तिकसूत्रेतुस
तःप्रामाण्यमर्थान्यथात्वकारणदोषज्ञानाभ्यामप्रामाण्यमित्यापिभ्रमाग्निहोत्रादिचोदनाभ्योसंदिग्धज्ञानोत्पत्तेःप्रामाण्यप्राप्तेन
चापवादकमर्थान्यथात्वज्ञानसाक्षादस्ति।नापिकारणदोषज्ञानं।पुरुषाश्रयत्वाच्छब्ददोषाणां।पदपदार्थसंवंधस्याकृत्रिमत्वात्त
द्वारापुरुषानुप्रवेशाभावा दनानामितिस्थितेः।शब्दस्यैवानित्यत्वात्कुतःसंवंधनित्यतेत्याक्षिप्यशब्दनित्यत्वंयाशब्दाधिकर
णेसंवमंवधनित्यत्वेममाहितेमाभूत्पदपदार्थसंवंधद्वारेणपुरुषानुप्रवेशःवाक्यवाक्यार्थयोस्तुलोकेसंवंधादर्शनान्निर्मूलं
ग्निहोत्रादिवाक्यार्थप्रामाण्यंसंभवतीतितद्भूताधिकरणेऽत्ययइत्यनेनाव्यामोहः।सामपिकोवाः।अनेनवाक्यार्थयोस्तुलोकेसंव
धादर्शनान्निर्मूलमग्निहोत्रादिवाक्यार्थप्रामाण्यंसंभवतीतितद्भूताधिकरणेप्रतिपादितेपुनर्वेदानीवाक्यात्मकत्वात्काठकादि
सामान्याख्यानाच्चपौरुषेयत्वात्तद्द्वारेणदोषसंस्पर्शमाशंक्यस्मर्तृत्वेवमत्यस्मरणाद्योग्यानुपलब्धिनिरस्तस्यकर्तुरनुमानास
भवात्समाख्यायाश्चप्रवचननिमित्तत्वादपौरुषेयावेदाइतितदेकदेशानांचोदनानां।सिद्धंप्रामाण्यमित्येवंसमस्तःपादश्चोदनासूत्रप्र

वेदस्यप्रामाण्यमित्या [illegible] मंचानपेक्षमाणानामेव ४

शा·प्र·
८

तिज्ञानार्थोपपादनेनतस्यैवपरीकरः। सोयंभाष्यकारानुसारेणपादार्थोनुक्रांतः। इतिकारमंतत्तुपश्चादनुक्रमिष्यामः। प्रकृतंतवानुस
रामः। प्रतिज्ञातंतावद्बोदनैवप्रमाणं प्रमाणमेवचेति। ननुप्रमाणस्यत्तोदूरनपेक्षप्रामाण्यंसंभववीतितत्तस्यैवधर्मेप्रामाण्यं। शब्दस्यतु
सर्वदैवप्रमाणांतरप्रभिन्नविषयत्वान्नतत्तदनपेक्षप्रामाण्यंसंभवतीति। उच्यते। प्रत्यक्षंतावत्संयुक्तविषयत्वेनविद्यमानोपलंभ
नत्वाद्भविष्यतिधर्मेनसमर्थीयद्यपिचगोदोहनादिद्रव्यंयागादिक्रियांनीचैस्त्वादिगुणाश्चफलसाधनत्वाद्धर्मशब्देनोच्यतेनापूर्वाद
यइतिश्रेयस्करभाष्यकृतेतथापितेषांफलसाधनरूपेणधर्मात्वात्फलस्यचजन्मांतरभावित्वाद्धर्मस्वरूपेणप्रत्यक्षविषयत्वंन
संभवति। तत्पूर्वकत्वाच्चानुमानादिकमपिनप्रमाणं। भावनाबलजंतुयोगिप्रत्यक्षंधर्मेभविष्यत्यविसमर्थमितितिमनोरथमात्रं। भा
वनाद्यनुभूतगोचरंनियतात्। नुनृतेधर्मविनिश्चयात्मिकांस्मृतिंजनयेत्। नवसाचप्रमाणंस्मृतिर्हिदेवानंतरांप्रत्यक्षंप्रतिनिर्मितत्वात्। नेंद्रिय
नत्वप्रत्यक्षलक्षणमपितुकल्पनापोढत्वमितिचेन्न। सुतरांधर्मस्याप्रत्यक्षत्वंफलसाधनरूपस्याविकल्पग्रहणासंभवात्। तस्मात्
दनिमित्तप्रत्यक्षं। तत्पूर्वकत्वाच्चानुमानाद्यपि। काश्यपीयाःपुनप्राप्तिमंत्रानेमहर्षीणांधर्मेपुमाणमाहुः। नतुलिंगाद्याभासजत्वात्प्र
माणमेवनभवतिकिंपुनर्धर्मेप्रमाणं। शब्दस्यतुबुद्धिजनकत्वादसत्ययनादेयुक्तंप्रामाण्यं। ननुनबुद्धिजननमात्रात्प्रामाण्यमुक्तंश्रय
यार्थ्यपिवाक्येषुबुद्धिजननाविशेषात्। सत्यं। नत्रतुकारणदोषबाधकप्रत्ययाभावायुक्तंप्रामाण्यमुक्तंश्रययथार्थेष्वपिवाक्येषुबुद्धि।
वेदेतुतदभावात्स्वतःप्रामाण्यमनयोर्दितेभवति। कथंपुनःप्रामाण्यस्यस्वतःप्रासिः तदर्थमिदंसर्वज्ञानान्यधिकृत्यचिंतनीयं किंप्रा
माण्यमप्रमाण्यंचोभयंस्वतएवावगम्यतेअथवान्यतरदपिस्वभावेनानिरूपितंकारणगुणदोषप्रत्ययाभ्यामवगम्यतेअत्रहरेरस्त्विदप्रा

राम
८

मात्तपस्वतत एवावगम्यते प्रामाण्यं तु कारणगुणज्ञानात्संवादज्ञानादर्थक्रियाज्ञानाद्वावधार्यत इत्युत्पप्रामाण्यं परस्वतः आप्तसदर्थान्य
थात्वकारणदोषज्ञानाद्बाधकज्ञानाद्वावगतेनाप्रामाण्येनापोद्यत इति॥ ननु सर्वकारणानां स्वकार्यशक्तेः स्वाभाविकत्वादुभयमपि ज्ञान
स्य स्वरसादेवावगम्यत इति केचित् तदयुक्तं। न हि ज्ञानं स्वविषयस्य तथात्वमतथात्वं च युगपच्छक्नोति बोधयितुं विरोधात्॥
अथ कांचिदप्रामाण्यं बोधयेत् ज्ञानव्यक्तिः कांचित्प्रामाण्यं बोधयतीत्युच्यते न तथापि नियुक्तं कारणान्तरनिरपेक्षज्ञानस्यैवोभ
यहेतुत्वे किंकृतानेभवनीति न शक्यं निरूपयितुं। अतो द्वयमपि स्वभावेन निरूपितं कारणगुणदोषज्ञानाद्वा प्रामवगम्यत इत्य
परो नदयप्रयेशात्। एवं गुणदोषावधारणात् प्रागनुत्पत्तेः कारणाभावात् कारणार्थमनवगमाय हि ज्ञानं निःस्वभावं स्यात्। तस्मादप्रामाण्य
स्वतः प्रामाण्यं तु संवादज्ञानादिभिरित्येतदप्ययुक्तं॥ तथा हि न ज्ञानमुत्पन्नमित्येतावतार्थतत्त्वावधारणायुक्तं व्यभिचाराद् निश्च
याद्वा प्रामाण्यमेव तस्यावेलायां प्रागपेक्ष्या तु कारणगुणज्ञानात्संवादज्ञानादर्थक्रियाज्ञानाद्वा प्रामाण्यावगमादयो घते। श
ब्दे चाप्रामाण्यं न तद्वगुणेन च वेदे तदस्ति अपौरुषेयत्वाभ्युपगमात्॥ अस्मत्पक्षे त्वेवाप्तप्रणीतत्वाभावान्न स्यात्तयः सप्रमाससनस्थ
णोत्तयावाण इत्येवमादीना। उन्मत्तप्रलपितत्वादनाप्तप्रणीतत्वादप्रामाण्यमेव चेदानीमिति॥ आचे भिश्रीआने॥ य
रापेक्षं प्रमाणत्वं नात्मानं लभते क्वचित्। मूलोच्छेदकरं पक्षं को हि नामाध्यवस्यति। यदि हि सर्वमेव ज्ञानं स्वविषयतथा
त्वावधारणे स्वयमसमर्थं विज्ञानान्तरमपेक्षते ततः कारणगुणसंवादार्थक्रियाज्ञानान्यपि स्वविषयभूतगुणाद्यवधार
णे परापेक्षत्वादपरमपि तथेति न कश्चिदप्यर्थो निश्चयसहस्रेणाप्यध्यवसीयते ततः प्रामाण्यमेवास्तीदेतत्। अथार्थक्रिया

शा·प्र· ६ ज्ञानं स्वतः प्रमाणमिति चेत्। को विशेषः। अव्यभिचार इति चेत्॥ न। स्वप्नावस्थायामसत्यस्यादकाहरणे ऽर्थक्रियाविज्ञानदर्शनात्।
अथ सुखज्ञानमेवार्थस्य क्रिया तच्चाव्यभिचार्येव। न हि कश्चिदप्यसति सुखे सुखज्ञानमस्ति। सत्यमेतत्॥ ननु तेन पूर्वज्ञानस्य
प्रामाण्यावसानं संभवति। अप्रमाणेनापि प्रियासंगमविज्ञानेन स्वप्नावस्थायां सुखदर्शनात्॥ तस्मात्स्वतःप्राप्तप्रामाण्यम
र्थान्यथात्वकारणदोषज्ञानाभ्यामयोधतस्त्वेवश्यमंगीकरणीयं॥ एवं च शब्देऽनाप्तपुरुषसंस्पर्शकृतत्वादोषाणामपौरुषेये
च वेदे तदभावात्सत्त्ववार्थान्यथात्वज्ञानाभावादनपोदितं प्रामाण्यं भवति। पौरुषेयवचनानि तु पुरुषबुद्धिप्रभवत्वाद्भ्रान्त्या विप्रलिप्स
या वा प्रयुक्तानि मूलदोषाणां दुष्टत्वादयथार्थानि भवन्तीति वैषम्यं॥ कश्चिदिह। न लोके पि शब्दस्यायथार्थत्वमस्ति। तदभावात्। नहि
लोके शाब्दं प्रमाणमस्ति। वक्त्रभिप्रायानुमापकत्वात्तु पुरुषवचसां। तेनानुमानस्येव व्यभिचारो न शब्दस्य। नवानस्यापि। विवेका
ग्रहणाद्धि लिंगएव लिंगाभ्यवहारप्रवृत्तिः। यदि तु शब्दस्यैव व्यभिचारोऽभ्युपगम्येत स्वाभाविकमेवाप्रामाण्यं स्यात्। नहि पुरुषदो
षेण शब्दस्य दोषो भवति॥ यथावस्थितशब्दाभिव्यक्तिमात्रे पुरुषस्य व्यापारात्। तदिदमसारं। यद्धि लोके शाब्दं नास्तीति तेनावेद
विकथं तत्स्यात्॥ तद्यभिप्रायानुमानत्वाण्यस्य शब्दस्यार्थप्रतिवाचकत्वप्रमाणमस्तीत्युक्तं न्यायरत्नमालायां। यदपि व्यभि
चाराभ्युपगमे स्वाभाविकमप्रामाण्यं भवति पुरुषदोषस्य शब्देऽनवतारादिति॥ स्यादेवं यदि वीमहावाक्यं नतु रूपो। भिंज्या
त। ननु नैनैव क्रियन्ते वर्णा नित्याः यदि नित्या॥ वाक्यानि तु पुरुषैरेव क्रियन्ते पौरुषेयत्वात्स्वा। यथावस्थिता नित्यज्यमाना निवेद राम ६
वाक्यवत्पौरुषेयाण्यपि वस्तुः। नतश्च वक्त्रभिप्रायानुमापकत्वमपि न स्यात्॥ तद्यथा श्रोतृभिरभिव्यज्यमाना निवेदवाक्यानि नाश्रो

१

ग्रप

प

न्दाणमभिप्रायंसूचयंति॥ तथापुरुषवाक्यान्यपि न स्वचेयपु यदापि व्यभिचाराशंका॥ लोके शब्दस्यार्थे प्रामाण्यं न संभवतीत्युक्तत
हक्र भिप्रायानुमानेपि तुल्यः अन्यथा संविदानस्यान्यथा वाक्यरचनादर्शनात्॥ किंच शब्दस्य वक्तुरादेरिव स्वसामर्थ्येन बोध
कत्वाद्व्यभिचारेपि न बोधकत्वहानिः॥ लिंगात्वव्यभिचारितयैव गमकमिति व्यभिचारिणोनुपपन्नं लिंगत्वमथ्य तु वक्तुराप्तत्वा
द्व्यभिचाराशंका निवर्ततेतेन तोनुमानं तथा सति शाब्दमेवार्थप्रमाणमस्तु प्रतिबंधकायाः शंकाया निरस्तत्वात्॥ अवश्यं हि बुद्धि
विशेषमस्तु भित्सता प्रथमं यदार्थोत्रालोचनीयाः तेषां चान्वययोगपतालोचनीया। नेवालोच्यमानाः संगेव वाक्यार्थमवबोध
यंति नानुमानं प्रतीत्तते। किंवानुमिते बुद्धिविशेषे पश्चादनुवादभूतं वाक्यं वाक्यार्थमवबोधयतीति चेत्। सिद्धांतः। ततश्च मानामान
मएवाप्रवृद्ध्या गृहीतस्तस्य वाक्यादयथार्थमेव ज्ञानमुत्पन्नमित्यभ्युपगंतव्यं। तत्र दोषाधीनत्वादप्रामाण्यस्य वक्तृदोषाणां च श
ब्दसंक्रान्त्यनभ्युपगमात्स्वारसिकमेव शब्दे दुष्टत्वमावश्यमिति कल्प्यादप्रामाण्यं वेदस्य प्रसज्यत इत्यासंगानावगतस्यादनाशेव
चसांसस्येवाप्रामाण्ये वक्तृदोषाधीनत्वाद्वेदे वक्तृदभावान्नप्रामाण्यमित्येव वक्तव्यं। तस्माच्चोदनालक्षण एव धर्मः श्रेयस्कर इ
त्यर्थः॥ यदेव श्रेयसः साधनस्तु यागहोमादि तदेव धर्म इत्युच्यते लोकेनापूर्वमंतःकरणात्मपादिवा लोकप्रसिद्धिविरहात्।
नत्वपूर्वमेव श्रेयःसाधनं। न। अपूर्वो नरव्यापारत्वात्॥ तस्माद्यागादिरेव श्रेयः। साधनरूपेण धर्मः॥ तद्रूपाभावाच्च न श्रूद्रकृतस्य
धर्मत्वापत्तिः। चोदनालक्षणमात्रस्य धर्मत्वमकाभूदित्यर्थशब्देन विशेष्यते। चोदनाशब्देन प्रवर्तकं निवर्तकं च वाक्यमुच्य
ते। तत्र च निषेधवाक्यैर्न हिंस्यादित्यादिभिरनर्थत्वेन लक्ष्यमाणानां हिंसादीनामपि धर्मत्वं स्यात्तद्व्यावृत्त्यर्थं यदेवार्थरूपेण

शा०प्र० ९

प्रवर्त्तकवाक्येपलस्येनतस्येव धर्मत्वंवक्तु मर्थग्रहणं। भाष्ये चश्येनादिग्रहणंतत्सा ध्याहिंसादिलक्षणार्थः। उपरिष्टाद्धिं
सा हिंसार्थेप्रतिषिद्धेतिविचारणात्॥ केचित्तुलक्षणापरिहरन्तःश्येनादिस्वरूपमेवार्थशब्दस्यव्यावर्त्यमन्यते।
तेषामवैनवश्येनारब्दयःकर्त्तव्या विज्ञायेतइति विधेयत्वनिराकरणेनप्रतिषेधविषयत्वसमर्थनात्॥ कथंपुनस्ते
षाविधेयत्वंनिराक्रियेत। तत्राहुः। यस्य हि विधिः सिध्यत्यन्यथाछ्यपयत्यभावात्स्वयमनुष्ठापयति॥ नचकर्त्तव्यतावोध
नमेवप्रवर्त्तनं। कर्त्तव्यताचवेदेलिङ्गायंत्स्यावबोधितेतिकथमस्य विधेयत्वं। सत्यं। नन्वयागस्यकर्त्तव्यतालिङाःभिधीय
ते। स्वार्थस्यकर्त्तव्यता लिङःनियोगस्य। भिधत्तेयागस्तुतस्य विषयःकथंचरणंच॥ सोयंकर्त्तव्यतात्मा नियोगोर्थाम्य
थानुपपत्यास्वविषयकर्त्तव्यतावोधयन्ननुष्ठापकइत्युच्यते। श्येनादीनांतुरागादेवानुष्ठानसिद्धेर्नविधिस्तेषामनुष्ठानमा
क्षिपतीतिनतेषांविधेयत्वं। असतिचविधेयत्वेतेषांनिषेधविषयत्वादनर्थत्वमितितद्यावत्यर्थमर्थपदमिति। तत्रेदंख
ण्ड्यं। कस्मिन्नंशेतेषांव्यावृत्तिःस्यात्। साचायुक्तेत्युक्तं। भवतुवावान्ममेदंगीकारेणधर्मलक्षणार्थमपिसूत्रंतथापिचो
दनालक्षणपदेनकार्यात्मकमपूर्वमुद्दिश्यतस्यतस्याधर्मत्वमुच्यतइतिवोमंतत्रश्येनादियागस्यकःप्रसंगोयद्यावृत्यर्थम
र्थपदंस्यात्॥ नहिज्योतिष्टोमयागस्यापिधर्मत्वमस्तिअपूर्वस्यधर्मत्वाभ्युपगमात्॥ अथश्येनाद्यपूर्वस्येवधर्मत्वपर्थपदेन
व्यावर्त्यते। ततोभाष्येश्येनादिग्रहणेनकर्त्तव्यंमनधेयनतत्साध्यमपूर्वंलक्ष्यतइतिअविशिष्टालक्षणास्यात्॥ यदिचापूर्वमेवप्रत्यु
दाहरणंततोहिंसाहिंसेतिभाष्यनोपपद्यते। श्येनयागोवातत्फलंवाहिंसातत्वपूर्वंकथंविदपिहिंसापदास्पदं। अपिश्चपत्तेक

शाम १०

थंपुनरनर्थःकर्तव्यतयोपदिश्यतइतिचोद्यंनैवंशेषेनास्यःकर्तव्याविज्ञायेतइतिचोत्तरमपूर्वविषयमेवस्यात्ःनचतस्याश
कंकर्तव्यत्वंचवारयितुंकार्यस्यभावात्॥एवंचयागकर्तव्यतानिषेधार्थमेवंदंभाष्यमंगीकृत्ययत्नत्समाधानायप्रयत्न
ने।कर्तव्यताविषयेहिनियोगोनपुनस्तस्यकर्तव्यतामहिति॥तस्यपार्थकं॥काम्येष्वपिविधिरेवप्रवर्तकोनफलं।त
स्यविध्यधीनोत्पत्तित्वेनयागापेक्षाभावात्॥विधिस्तुयागाधीननिष्पत्तित्वाद्यागमनुष्ठापयतीतियुक्तं।यदिवविधि
रप्रवर्तकःकाम्येषुस्यात्इतिकर्तव्यतानाप्यविधेयास्यात्।तस्यामपिफलतएवप्रवृत्तिसिद्धेःसांगप्रधानस्याप्यत्वात्फल
स्य।तस्यतिहितयुक्तेनुफलस्कृतिस्तस्मात्सर्वविकीर्णेति॥ननश्चाग्नीषोमीयहिंसायाअपिविध्यभावेनतिषेधविषय
त्वात्तद्युक्तस्यज्योतिष्टोमस्यानर्थत्वापत्तेःकोर्थोयोनिःश्रेयसायज्योतिष्टोमादिरितिभाष्यानुपपत्तेः॥ननुनहिंस्यादितिनि
षेधोनारभ्याधीतत्वात्पुरुषार्थः॥तेनानेनपुरुषार्थाएवहिंसाःप्रतिषेद्धव्याः॥क्रत्वर्थप्रतिषेधेहिंसोपित्क्रत्वर्थःस्यात्॥
प्रविशेषत्वेकस्यप्रतिषेधविधेः॥क्रत्वर्थपुरुषार्थत्वायत्यावैरूप्यंस्यात्।तस्मात्पुरुषार्थानामेवहिंसानामिहप्रतिषेधो
नक्रत्वर्थानामिति।तदिदंवाक्यसंमोहनं।नह्यविशेषेणापिप्रतिषेधेवैरूप्यं॥यदिहिक्रत्वर्थपुरुषार्थविशेषानुदिश्य
प्रतिषेधःप्रतीयेततनःस्याद्यदिवैरूप्यं।प्रतिषेद्धव्योयस्यापित्क्रतुपुरुषयोगोवस्त्वान्निषेधस्य।यदातुहिंसामात्रमनु
दिश्यप्रतिषेधःक्रियतेतदाकिंवैरूप्यं।तद्यथायाभोजनार्थंमांसोत्पादनेहिंसायावैरनिर्यातनार्थतयासान्नानु

शा॰प्र॰ ११ रुषार्थनस्याप्युभयथामविशेषेणप्रतिषिध्यमानायामपिनास्तिवैरूप्यंएवमिहापिश्चनरथान्तत्रापिभोजनागतपुरु
षार्थतावप्रतिषेधस्यस्यादितिवैरूप्यंस्यात्॥ तस्माद्येवकाविधेनकेनापिप्रकारेणप्रसक्ताहिंसासासर्वासाम्या
न्येनप्रतिषिध्यते।पुरुषार्थश्चप्रतिषेधोऽनारभ्याधीतत्वात्।तस्मादग्नीषोमीयहिंसायामसतिविधेयत्वप्रतिषेधगो
चरःस्यात्।विधेयत्वेविधेर्विशेषविषयत्वात्सामान्यविषयोनिषेधस्तद्विरोधाद्धिंसांतरापवर्त्यते॥ ननुसत्यपिवि
धेयत्वेविधेःक्रत्वर्थत्वात्प्रतिषेधस्यचपुरुषार्थत्वाद्विषयभेदेनाविरोधान्नबाधः।नहीदंविरुद्धःक्रतोर्हिंसयाभवितव्यंपुरु
षस्यनतुतद्वर्जनेनेति॥ सत्यं।आगविधिमात्रालोचनायांनास्तिविरोधः।ज्योतिष्टोमविधिस्तुसांगप्रधानपुरुषस्यैव
रसपुरुषार्थंहिंसानिषेधमग्नीषोमीहिंसायामवतरन्निरुणद्धि।नह्यग्नीषोमीयहिंसांवर्जयित्वाज्योतिष्टोमःशक्यते
नुष्ठातुं।तस्माद्दस्तिविरोधइतिसामान्यस्यबाधः।विशेषोत्वप्रवर्तकेसतिअग्नीषोमीयहिंसापिप्रतिषिध्येत।किमर्थंच
श्येनस्यविधेयत्वंनिशक्यते।प्रतिषेधसिध्यर्थमितिचेत्॥ कःप्रतिषेधः।नहिंस्यात्सर्वाभूतानीति।नायंनिषेधःश्येने
प्रवर्तितेहिंसाविषयत्वात्॥ कश्चित्वाह।श्येनस्यकर्तव्यत्वेसतितत्फलमपिहिंसाकर्तव्याप्रवर्ततीतिननिषेधंशक्यते॥ अ
नःफलकर्तव्यतानिरासार्थंश्येनकर्तव्यतानिरस्यतइति॥ तदिदमसंबद्धं।यथैवश्येनापूर्वस्यकर्तव्यतायांसत्यामपितत्साध्य राम ११
स्यफलस्यकर्तव्यतानप्रसज्यतेतथायागकर्तव्यत्वेसत्यपिरागप्राप्तस्यफलस्यनास्तिकर्तव्यतापत्तिः।तस्मादनर्थकंश्येनकर्त

व्ये न फलं हिंसा न श्येनः। तथाचोक्तं धोहि ... विधिनैस्यात्प्रमभ्युपगच्छति एतेषामुपदेशात् ३

वात्तानिराकरणं।तस्माद्धिंसैवात्रभत्त्युदाहरणं।।इदंचापरमेकदेशिनःअपघाः।अर्थशब्देनकिमुच्यतइति।यदिश्रेयःसाधनं
नित्यानांधर्मत्वंनस्यात्।।अथयन्ननिषिद्धफलत्वंभवतितदर्थशब्देनोच्यतेतथासतिनअर्थविषयस्यापूर्वस्यधर्मत्वप्रसं
गः।चोदनालक्षणत्वान्निषिद्धफलाभावाच्च।।भवत्वितिचेत्।।न।लोकविरोधात्।।योहिहिंसायामुपयुक्तःप्रतिषेधवशा
न्निवर्त्ततेनतंधार्मिकइत्याचक्षतेकिंत्वधर्मान्निवृत्तइत्येतावदाहुः।लोकसिद्धस्यलक्षणंपरीक्षकैर्वक्तव्यंनत्वध्यादिवस्य
रिभाषणमित्यास्तांतावत्।। ।।इतिचोदनासूत्रं।। ।।तस्यनिमित्तपरीष्टिः।।अनेनसूत्रेणचोदनारूपस्यनिमित्तस्य
परीक्षणमस्मिन्पादेकर्त्तव्यमाणमथातःशेषलक्षणमथ्यविशेषलक्षणमितिवन्मुखग्रहणार्थमनुकीर्त्यते।।सत्संप्रयो
गेपुरुषस्येन्द्रियाणांबुद्धिजन्मतत्प्रत्यक्षमनिमित्तंविद्यमानोपलंभनत्वात्।।चोदनेवेच्चस्यार्थस्यसाधनायप्रत्यक्षादी
नामनिमित्तत्वमुच्यते।।प्रत्यक्षंतावदिन्द्रियार्थसंयोगजत्वेनविद्यमानोपलंभनत्वाद्भविष्यतिधर्मेननिमित्तं।।सत्संप्र
योगजन्यत्वमाभासेष्वपितुल्यत्वान्नलक्षणमितिनैयायिकाद्दूषयंतितन्नतुलक्षणानभिधानाददूषणं।।नहीदंलक्षणं
अन्यत्तस्यकिंत्वनिमित्तत्वकथनमात्रंतत्रहेतुर्विद्यमानोपलंभनत्वंतत्साधनंचसत्संप्रयोगजत्वं।।नहिसत्संप्रयो
गजमविद्यमानोपलंभनंसंभवति।।इन्द्रियार्थसंयोगजत्वंसुखादिज्ञानेष्वव्याप्तेरहेतुरितिचेत्।।न।तेषामपिमनःसं
ज्ञकेन्द्रियसंप्रयोगजत्वात्।।मनःसंज्ञकंचसुखादिज्ञानमेवप्रमाणं।।अपरोक्षावभासज्ञानस्येन्द्रियाधीनतयारूप।

शा॰प्र॰ द्विज्ञानेषुव्यभिचारदर्शनात्॥ सुखादिविषयमपरोक्षज्ञानमिंद्रियमनुमापयति। तत्रचक्षुरादीनामसंभवात्तेभ्योन्यदवतिष्ठे
१२ ते। अत्रकश्चिन्नित्यद्रव्यविशेषगुणत्वात्सुखादीनांद्रव्यांतरसंयोगजत्वंपार्थिवपरमाणुगतरूपादीनामग्निसंयो
गजत्वदर्शनात्। य तद्रव्यांतरंतन्मनइत्याह। तन्न। शरीरंहि भोगायतनं। किंचतस्यभोगायतनत्वमन्यन्नतत्संयोगा
पेक्षसुखाद्युत्पत्तेः। अशितपीताद्याधारत्वञ्चनवहिःशरीरात्सुखाद्युत्पत्तिः। अतःशरीरसंयोगादेवसिद्धेर्नद्रव्यांतरानुमा
नंकिंच। पार्थिवगुणानामेवद्रव्यांतरसंयोगापेक्षादृष्टानद्रव्यमात्रगुणानां। तेजःसंयोगएववकारणतयादृष्टेनद्रव्य
मात्रसंयोगः। तस्मान्नैवंमनःसिद्धिरितिसुखाद्यपरोक्षज्ञानमेवमनसोलिंगं। किंपुनरिंद्रियलक्षणंचक्षुरादिषुमनसि
चानुस्यूतं। उच्यते। यत्संप्रयुक्तेर्थेविशदावभासंविज्ञानंजनयतितदिंद्रियमित्युच्यते। तच्चद्विविधं। बाह्यमाभ्यंतरंच। बा
ह्यंपंचविधं। घ्राणरसनचक्षुस्त्वक्श्रोत्रात्मकं। आंतरंत्वेकंमनः। तत्राद्यानिचत्वारिपृथिव्यप्तेजोवायुप्रकृतीनीत्य
त्तपाददर्शनवदभ्युपगम्यते। श्रोत्रंचाकाशात्मकंतैरभ्युपगतं। वयंतुदिशःश्रोत्रमितिदर्शिनोदिग्भागमेवकर्णशष्कु
ल्यवच्छिन्नंश्रोत्रमाचक्ष्महे। मनस्तुपृथिव्यादीनामेवान्यतमात्मकंतेभ्योन्यद्वा। तदस्तुसर्वथानावदस्तिमनः। तच्चा
न्मतद्गुणेष्ववस्थितंतत्रप्रवर्त्ततेनबाह्येषुरूपादिष्वित्यांतरमुच्यते। रूपादिज्ञानेष्वपितच्चक्षुरादिसहायंप्रवर्त्ततेतएव राम १२
॥ अनुमानादिष्वपिलिंगादिसहायं। अन्यमनस्कस्यप्रसन्नसंप्रयोगेपिरूपादिषुज्ञानानुत्पत्तेः। नन्वेवमनुमाजादीनांमन।

जन्यत्वान्नैषांचभूतभविष्यतोरपिप्रवृत्तेरिंद्रियजत्वंविद्यमानोपलंभनत्वेनानैकांतिकं।स्याद्यदींद्रियजत्वंहेतुःस्यात्
।इंद्रियसंप्रयोगजत्वंतुहेतुः।नह्यनुमानेनानीतायाभविष्यत्तायावार्ष्टेरनुमीयमानायामनसासंयोगोस्तीत्यव्यभिचारः
।तदेवंप्रत्यक्षंतावदनिमित्तं।नन्वेवंकत्वाच्चानुमानाद्यपि।नह्यगृहीतेधर्मिकस्यचिह्नेनसहसंबंधग्रहणंसंभवति॥
सादृश्यविषयत्वाच्चोपमानंदूरस्थं।अर्थापत्तिरपिधर्मिणः।किंत्वनुपपद्यमानस्यकस्यचिददर्शनादसमर्था।ननुजग
द्वैचित्र्यमनुपपन्नं।नस्वाभाविकत्वेनोपपत्तेः।यद्यपितदनुपपत्त्याकिंचिददृष्टंकल्प्यतेतथापिकोधर्मःकोवाधर्मइ
तिविवेकाभावादवश्यमर्थनीयावेदना।साचेयंगीकृताकृतमर्थापत्त्यासासामान्यतोदृष्टेनवा।ननुविकल्पनिमित्तंसंबं
धग्रहणंनतत्कथंप्रत्यक्षपूर्वकत्वं।सविकल्पकमप्युपरतेंद्रियव्यापारस्यजायमानमपरोक्षावभासत्वात्प्रत्यक्ष
मेवेत्यदोषः।विकल्पश्चापरोक्षभासश्चेतिचित्रं।अपरोक्षंहिस्वलक्षणमुच्यतेतद्विषयोवभासोपरोक्षावभासः
।विकल्पस्त्वभिलापसंसर्गयोग्यप्रतिभासत्वान्नस्वलक्षणंस्पृशति॥नह्यभिलापाःस्वलक्षणंस्पृशंति।यदिस्पृशे
युरभिलापमात्रेणापिविनाक्षव्यापारमपरोक्षावभासःस्यात्।नचासावस्ति।तदुक्तं।अन्यथैवाग्निसंयोगाद्दाहंदग्धो
—मन्यते।अन्यथादाहशब्देनदाहार्थःसंप्रकाशतइति।तस्मादभिलापास्तावन्नविशदाकारमवभासयंतितत्समान
विषयाविकल्पाअपि।यत्त्वयंविस्फारिताक्षस्यगौरयमितिविकल्पेविशदावभासःससमानकालविशदाभासविर्वि

शा.प्र. कल्पकसंसर्गाकृतः॥ तदभावेभिलापमात्रेनुमानेच विकल्पाकारप्रतिभासे वैशद्याभावात्। तस्मान्निर्विकल्पकमेव
१३ स्पष्टः तेनैव विशदस्वलक्षणस्यावभासः। एवं उन्मीलितनेत्रस्य विकल्पोपि गोरयमित्यपरोक्षावभासः एवप्रतीय
तेनासावन्यसंसर्गाकृतः प्रमाणाभावात्। अभिलापसंसर्गयोग्यस्यापि सामान्याकारस्याभिलापलिंगादिभिरवैश
द्यमिंद्रियेष्ववैशद्यमुपपद्यत एव॥ नह्ययं परोक्षापरोक्षापरोक्षविभागो विषयकृतः यदि हि तथा स्यात्तदैव सामान्य
परोक्षं स्यात् स्वलक्षणं वापरोक्षं स्यात् न चैवमस्ति। सामान्याकारस्यापि परोक्षापरोक्षविभागदर्शनात्॥ तथा हि दूराद्वृ
क्षस्वलक्षणं पश्यन्न निर्धारितगवाश्वजातिविशेषो वृक्षादिशब्दश्रवणाद्वृक्षत्वं तस्मिन्नेव स्वलक्षणेनुमिमानोपि परो
क्षं बुध्यते। वदंति हि अश्वं पश्यन् चक्षुषा न तथा भासत इति। प्रत्यासन्नश्च वदति संप्रत्यश्वत्वं चक्षुषा पश्यामि न शृणोमि
ति॥ स्वलक्षणं तु प्रागपि विशदमेवेति सामान्यांशगत एव दूरसमीपवर्तिनः परोक्षापरोक्षविभागः। तस्मात्कारणकृ
तोयं विभागः। एकस्मिन्नपि विषये इन्द्रियैर्जन्यमानं विज्ञानमापरोक्ष्यं जनयल्लिंगादिजन्तु नेति किं नोपपद्यते। ज्ञानजन्या विष
यगतः फलविशेषोयमापरोक्ष्यं नाम सर्वस्वसंवेद्यः यद्भावाभ्यां लिंगाभ्यामक्षैः यश्याभि न पश्यामीति विस्फारिताक्षा
णामेवव्यवहारः प्रवर्तते। अतोस्ति विकल्पस्यापि विशदावभासत्वमिति प्रत्यक्षत्वोपपत्तिः। केचित्तु सविकल्पकमे राम
वसंवेदनं न निर्विकल्पकं किंचिदस्तीति मन्यंते तत्तु प्रतीतिविरुद्धं प्रतीमो हि वयमक्षसंनिपातानंतरमविविक्तसामान्य १३

13

विशेषविभागंसंसृष्टवस्तुमात्रगोचरमालोचनज्ञानं।तदभावेतुविकल्पएवनजायेत।विकल्पयताहिपूर्वानुभूतं
ज्ञातिविशेषसंज्ञाविशेषंचानुस्मृत्यतेनपुरःस्थितंवस्तुविकल्पनीयं।नचाधमदृष्टवतस्तत्स्मरणमुपपद्यते।तस्मा
दस्तिनिर्विकल्पकमपिज्ञानं।तत्रसन्मात्रविषयमितिके।चित्तुभेदस्यापिविकल्पवेद्यत्वात्।अगृहीतेचभेदेविशेषा
णामग्रहणात्।किंचइतरेतराभावोभेदः।नासौप्रत्यक्षेणग्रहीतुंशक्यते।नतरांनिर्विकल्पकेन।अतश्चनेहनानास्तिकिं
चनेत्यादीनांनानात्वनिषेधानांप्रत्यक्षादिविरोधाभावादेकमेवाद्वितीयमित्यादिश्रुतिभिरद्वितीयंब्रह्मसिद्धं।तदिदम
तिसाहसं।किंखलुभवतोनीलपीतयोःस्निग्धमधुरयोःशीतोष्णयोःसुखदुःखयोश्चाविलक्षणाबुद्धिः।यद्येवंनात्रो
त्तरंवक्तव्यं।नचसाविकल्पकेनविशेषग्रहणमितिवाच्यं।अविकल्पकेनविकल्पकस्यापिविलक्षणत्वसंभवा
त्।यत्त्वनस्यपिभेदमस्माद्भिन्नमित्येवंनविकल्पेनैवभेदोग्रहीतव्योनाविकल्पेनतस्यग्रहणंसंभवतीति।नह्यमीभेदस्यग्र
हणंकिंतुभिन्नानांतेषामपिनभिन्नतया।किंतुस्वरूपेणयदन्यस्माद्भिन्नंनीलंपीतंवातत्तद्गृह्यतइतिक्रमः।नहिनी
लंपीतंभेदः।तयोर्हिधर्मोभेदः।तदग्रहेऽपिधर्मिणोर्ग्रहणंनानुपपन्नं।यदिसन्मात्रंप्रत्यक्षेणगृह्येतननीलंपीतंवा।अ
तोविकल्पेनापीदमस्माद्भिन्नमितिकथंभेदोगृह्यते।नहिसदेवसतोभिन्नमितिसंभवति।तस्मान्नीलादिगुणानांपृथिव्या

शां.भ्र. १४

दिइव्याणांवप्रत्यक्षग्रहणात्प्रपंचापलापः प्रत्यक्षविरुद्ध एव।यदितुपृथिव्यादिप्रपंचंनापह्नुमहेतद्धर्मंतुभेदमेवेतिब्रूया
त्तदप्यशक्यं।नीलपीतयोरितरेतराभावस्यप्रत्यक्षानुपलब्धिसिद्धस्यापह्नवासंभवात्।प्रत्यक्षाभावोपिहिप्रत्यक्षव
देवप्रमाणांतरेभ्योवलीयान्।इतरथाशशस्यचतुष्पात्त्वाद्विषाणित्वमनुमीयेत।अतोनभेदापलापःसंभवति॥य
दित्वितरेतराश्रयतयाइतरेतराभावग्रहणस्यानव[illegible]भेदविधमात्रंनिभिन्नंतवित्वव्यतेतदपियदिभिन्नतयाप्रतियो
गिनमाश्रयंवगृहीत्वाइतरेतराभावोगृह्येततःस्यात्।नीलपीतयोस्त्वितरेतराभावानादेशाद्गृह्यमाणयोःपश्चादि
तरेतराभावग्रहणं।किमितरेतराश्रयं॥यदितुद्वित्वमपह्नूयेततत्पृथिव्यादयस्तदपिप्रत्यक्षविरुद्धं।संख्यायाःप्र
त्यक्षत्वात्।सत्यपिप्रत्यक्षविरोधेतदुपमर्देनप्रवर्तमानस्तद्बाधेनैवागमोऽद्वैतमवभासयतीतिचेत्।न।अद्वैतस्यसंभ
वात्॥प्रत्यक्षंहिनिरपेक्षं।श्रुतिर्हिनिरपेक्षत्वंशीघ्रजीयमानस्वविरुद्धस्यागमिकस्यज्ञानस्यपदव्यपदार्थसंबंधसन्निध
पेक्षायोग्यत्वन्यायालोचनसापेक्षतयाविलंबितप्रवृत्तेःप्रवृत्तिमेवनिरुणद्धि॥किंवाशक्यमेवश्रुत्याप्रपंचस्या
सत्त्वंबोद्धुं।बुध्यमानेहिश्रुतिरपिप्रपंचांतर्गतत्वादसतीवोद्धव्यास्यात्॥कथंचश्रुत्यैवश्रुतेरसत्त्वंबुध्येत।अ राम
सत्वेनहिप्रतीयमानानप्रमाणंस्यात्।प्रमातान्वितत्वव्यवस्थितेसत्त्वयाप्रतीयमानायाःश्रुतेर्नमिथ्यात्त्वंवक्तुंशक्यं।नह्येक १४

14

स्यैववस्तुनोयुगपद्येदवसत्त्वमसत्त्वंचसमुच्चित्यवोक्तुंशक्यं॥अन्यतरोपमर्देनद्यन्यतरद्बुद्ध्यावारोहति।ततःश्रुतिरपि
चेन्नप्रपंचस्याभावःसंभवतिश्रुतेरपिप्रपंचत्वात्॥नास्तिचेच्छ्रुतिःप्रमाणाभावेनभवतुस्वयंप्रकाशप्र
पंचाभावस्यकिमायातं।सद्विप्रमाणमपेक्षततएव।कथंचाविद्यमानस्यप्रपंचस्यप्रतिभासः।अविद्ययेतिचेत्॥
कस्यपुनरियमविद्या।जीवानामितिचेत्॥नतेषामभावात्।भावेवाद्वैतप्रसंगः॥ब्रह्मणस्तुविशुद्धविद्यात्मके
निरवकाशैवाविद्या।विद्यात्मकमपिब्रह्माविद्यामभ॥ब्रह्मणस्तुविशुद्धविद्यात्मकेनिरवकाशैवाविद्या॥वि
द्यात्मकमपिब्रह्माविद्याशबलमिवभ्रांत्यावगम्यतइतिचेत्॥कस्येयंभ्रांतिः।यदिनकस्यचित्सूक्तं।यदि
जीवानांनदभावात्॥यदिब्रह्मणःनास्यभ्रांतिःसंभवतीत्युक्तं।यदिचविद्यारूपेप्यविद्यास्यात्केनासाबाध्येत।
ध्यानादिभिरितिचेत्।नतेषामभावात्॥भावेवाद्वैतायत्तिः।ब्रह्मणस्तुसहावस्थानादविरुद्धाविद्यानतेनोच्छे
त्तुंशक्या।ततश्चानिर्मोक्षप्रसंगः।तस्माद्ब्रह्मणःप्रशंसार्थैरस्थापितत्वेनप्रपंचस्यासत्त्वंतुपचरद्भिरौपनिषदैर्वा
दैस्तदनुसारिभिश्चेतिहासपुराणैर्भ्रांतानानांवाक्यतात्पर्यमजानानांचाभियोगशून्यानांप्रलापोयमद्वैतवाद
इत्युपेक्षणीयः।नत्विदमविकल्पस्यप्रत्यक्षस्यविशेषविषयत्वं।अपरेतुस्वलक्षणमात्रगोचरमविकल्पकमि

शां.प्र.
५५

15

छंति। तदपिप्रतीतिविरुद्धं। प्रतीयते हि संमुग्धाकारं वस्तु सहसैव यत्पश्चाज्जातिद्रव्यगुणक्रियानामभिः पंचधावि
कल्पेन विकल्प्यते। गौरयं दंडायं शुक्लोयं गच्छत्ययं डित्थोयमिति। तत्र निर्विकल्पकमनेकाकारं वस्तु संमुग्धं गृह्णा
ति॥ सविकल्पकं त्वेकैकाकारं जात्यादिकं विविक्तं विषयीकरोति॥ ननु षष्ठोपि विकल्पोस्ति स एवेदमिति तत्
त्कथं पंचधा विकल्प इत्युच्यते। न ह्ययं जातिविकल्पः। व्यक्तिप्रत्यभिज्ञा हीयं। न संज्ञाविकल्पः। अनवगतसं
ज्ञानामपि भावात्॥ तिर्यंचोपि ह्यघजाताः स्वमातरं प्रथममनुपलभ्य क्षणांतरे पुनरुपलभमानाः सैवेयमि
तिशब्दानुवेधशून्यमेव प्रत्यभिजानंति। तस्मादियं षष्ठी कल्पनेति पंचविधत्वानुपपत्तिः। उच्यते। इयमेवा
स्माभिर्नामकल्पनेत्युच्यते। तथा हि। डित्थोयमिति नावज्ञोरयमिति वक्तवात्मना डित्थात्मना वस्तु विक
ल्प्यते नतु दंडिवत्तत्संबंधितया। मत्वर्थानुपादानात्। तत्र डित्थशब्दो न जातिवदर्थस्यात्मा। अत्यंतभिन्न
त्वात्। यतस्तेनैवार्थोनुरज्यते। तदेतदेकविज्ञेयं। डित्थ्या। [illegible] देन तदा वाच्यं पूर्वावगतं डित्थमनुपस्थाप्य तदा
त्मना पुरःस्थितोर्थो विकल्प्यते डित्थोयमिति। किमुक्तं भवति योसावस्माकं डित्थः सोयं पुरःस्थितो ना
न्य इति। सेयं व्यक्तिप्रत्यभिज्ञैव पंचमी कल्पना॥ या च शब्दविदां नामरूपेणैव भवतीति नाम विकल्पनेति व्यव

राम
५५

क्षिपते। एतेन यदाहुः। उत्थोयमित्यशब्दाकारस्यार्थस्य शब्दाकारेणाविकल्पनादप्रमाणं सविकल्पकमिति तन्
दपि निरस्तं। नह्यत्र शब्दाकारेणार्थः प्रतीयते। पूर्वावगतार्थस्मरणमात्रे शब्दस्य व्यापारात्। तेन च स्मृते नार्थे
न पुनः स्थितार्थविकल्पनात्॥ आह॥ यदा नु यादृशः पिंडः पूर्वं दृष्टस्तादृक् प्रतीयते। तादृशस्मरणे हेतुः शब्दस्तत्र
यथार्थं नेति॥ अस्मान्नाम विकल्पेपि जात्यादिविज्ञानस्य न रूपारोपः। किं पुनर्जात्यादिभिर्विकल्प्यते। उच्यते। किं पुनरि
दं द्रव्यं नाम। पृथिव्युदकतेजोवायुप्रभृति। ननु रूपादिव्यतिरिक्तं द्रव्यं नाम न किंचिदुपलभामहे। न च तस्योपलंभक
मस्ति। चक्षुरादीनां पंचानां रूपादिविषयोपजीवित्वात्॥ गंधरूपरसस्पर्शसंघातः पृथिवी। रसरूपस्पर्शसंघात
आपः। रूपस्पर्शसंघातस्तेजः। शब्दस्पर्शसंघातो वायुः। एवं रूपादिसंघातभेदादेव पृथिव्यादिविभागो न द्रव्यं नाम किं
चिदिति सौगताः। तदयुक्तं। आगमापायिषु रूपादिषु यदनयापि प्रत्यभिज्ञायते तद्द्रव्यं। दर्शनस्पर्शनाभ्यां चास्य ग्र
हणं। प्रत्यभिज्ञा च॥ यथा बदरफलं श्यामावस्थायां रक्तावस्थायां च। यथा वा घटपिंडकपालावस्थासु मृद्द्रव्यं।
अस्ति हि तत्र पिंडाद्यवस्थाभेदे श्यामरक्तभेदेपि द्रव्यप्रत्यभिज्ञा। मृदपि पिंडावस्थामपहाय घटावस्थामपहाय क
पालिकां संजातेति। एवं तन्तुपटाद्यवस्थास्वपि द्रष्टव्यं। ननु तन्तुपटादिषु द्रव्यान्तरोत्पत्तिरेवाभिमता। अन्यथा ह्यव

शा.प्र. यवापलापः स्यात्॥ नावयविनमपह्नुमहे द्रव्यांतरोत्पत्तिं तु नेच्छामः॥ प्रतिपत्त्यभावात्॥ तंतव एव संयोगविशेषाद्व
१६ कुड्यत्वमापद्यंते ऽवयवीव भवंति॥ तादृशाश्च पटजातिं स्थौल्यं च बिभ्रत एक पट स्थूल बुद्ध्याग्रहीत इति लौकि
कीप्रतिपत्तिः॥ अतो न द्रव्यस्य कदाचिदागमो ऽपायो वा॥ घटपटगवाश्वशुक्लरक्ताद्यवस्थानामेवागमापायौ॥
[illegible]॥ आविर्भावतिरोभावधर्मकेष्वनुपायि यत्। तद्धर्मि यत्र वा ज्ञानं प्रत्यभिज्ञाग्रहणाद्भवेदिति॥ तथा यादृश
मस्माभिरभिहितं द्रव्यं तादृशस्यैव हि सर्वस्य गुणा एवाभिधानेन स्वरूपमिति॥ न त्वसिद्धं द्रव्यं॥ तच्च जात्यादिभि
ः पंचधाप्य विकल्पकेन विभज्यत इति अतः सविकल्पकमपि प्रत्यक्षं॥ तत्पूर्वकं चानुमानादीति सिद्धं तेषामप्यनिमि
त्तत्वं॥ ॥इति प्रत्यक्षसमत्वं॥ औत्पत्तिकस्तु शब्दस्यार्थेन संबंधस्तस्य ज्ञानमुपदेशो॥ व्यतिरेकश्चार्थेनुपलब्धे तत्प्रमाणं बा
दरायणस्यानपेक्षत्वात्॥ उक्तं प्रत्यक्षादीनामनिमित्तत्वं तत एव तन्मूलपुरुषवचनस्याप्यनिमित्तत्वं॥ एवं तर्हि शब्दस्य सर्वत्र
प्रमाणांतरापेक्षत्वैव प्रामाण्यदर्शनात्तदभावे तस्याप्यप्रामाण्यापादभावेनाप्यत्वमेवायातं धर्मस्येत्याशंका निराकरणं चोदना
याः प्रामाण्यमपच्यते॥ [illegible]ऽपि लोके प्रमाणांतरमूलानां प्रामाण्यमतन्मूलानां चाप्रामाण्यं दृश्यते [illegible] न त्वेवमपि सापेक्षप्रा
माण्यं किंतु स्वत एव॥ अनाप्तवाक्यस्य त्वप्रामाण्यं न मूलविरहात् किंतु दुष्टमूलतया शब्दस्य दुष्टत्वात्स्वाभाविकस्य प्रामाण्य राम
स्यापवादात्॥ अपौरुषेये तु वेदे यद्यप्याप्तप्रणीतत्वं नास्ति तथापि प्रामाण्यस्य तदपेक्षाभावादनाप्तस्पर्शनिमित्तदोषाभावा १६

16

क्षणोदितं प्रामाण्यमदीनात्रेधा ह्यत्र पुरुषानुप्रवेशः पदपदार्थसंबंधद्वारेण वाक्य वाक्यार्थसंबंधद्वारेण वा ग्रंथस्यैव च वा भार
तादिवत्पौरुषेयत्वात्। नत्वेतत्त्रयमप्यस्ति। पदपदार्थसंबंधस्य नित्यत्वमत्रौत्पत्तिकशब्देनोक्तं। वाक्यार्थस्य च पदार्थमूल
त्वं वेदस्य चापौरुषेयत्वमुपरिष्टाद्वक्ष्यते। न च साक्षाद्बाधकमस्तीत्यव्यतिरेकं शब्देनोच्यते। अनुपलब्धार्थत्वाच्च नानुवाद
लक्षणमप्रामाण्यमस्तीत्यर्थेऽनुपलब्ध इत्यनेनोक्तं। एवं विशेषणत्रयमुपाददानेन सूत्रकारेण कारणदोषबाधक
ज्ञानरहितमगृहीतग्राहि ज्ञानं प्रमाणमिति प्रमाणलक्षणं सूचितं। नन्वेवं धारावाहिकेषूत्तरोत्तरेषां पूर्वपूर्वगृहीता
र्थविषयत्वादप्रामाण्यं स्यात्। तस्मादनुभूतिः प्रमाणमिति लक्षणं। स्मृतिव्यतिरिक्ता च संवित्तिरनुभूतिः। स्मृतिश्च संस्का
रमात्रजं ज्ञानमभिधीयते। मात्रग्रहणं च संस्कारसध्रीचीनेंद्रियजस्य प्रत्यभिज्ञानस्य स्मृतित्वप्रसंगेनाप्रामाण्यं मा प्रस
ञ्जीदित्येवमर्थं। तदेवं संस्कारातिरिक्तकारणाजन्यज्ञानं प्रमाणमित्युक्तं भवति। तदिदं स्वप्नदर्शने तावदव्यापकं॥ सं
स्कारमात्रजस्यापि ज्ञानस्य स्वरूपे कर्तरि च प्रामाण्यमिष्टं भवतां। अथ स्मर्तव्यापेक्षयैव स्मरतेः स्मृतित्वं न हि विषयसंस्का
रजत्वात्॥ स्वरूपकर्त्रपेक्षया त्वनुभूतिरेव साऽतः सिध्यति प्रामाण्यमित्युच्यते। एवं तर्हि मात्रग्रहणमनर्थकं। प्रत्य
भिज्ञानस्यापि पूर्वानुभूतांशापेक्षयैव स्मृतित्वात्। तत्र चाप्रामाण्यमिष्टमेव। यत्र त्वंशे प्रामाण्यं तत्रानुभूतिरेव सा॥ किं
चानुवादीनां य एवं विद्वान् पौर्णमासीमित्यादीनामपि संस्कारमात्रजत्वाभावात्प्रामाण्यं स्यात्। भवत्विति चेत्। नालोकवि

शा॰प्र॰ १७ राधात्॥ तथा लौकिकमपि वाक्यं वक्तृज्ञानानुमितेर्थेऽनुवादकं तया प्रवर्त्तमानं प्रमाणं स्यात्। न चैतदिष्टं भवतां। अ
सन्निकृष्टग्रहणमनुवादानां शास्त्रत्वनिवृत्त्यर्थमित्यंगीकरणात्। अथानधिगतप्रमाणं यत्स्वविषये प्रमाणं तत्तरं नापे
क्षते तत्प्रमाणं अनुवादानां तु पुरोनादापेक्षत्वादप्रमाणमिति। एवं तर्हि लौकिकं वाक्यमप्यनुमितेप्यर्थे प्रवर्त्तमानमनु
मानस्पर्शकाभिराकरणमात्रोपयिकत्वादर्थप्रतिपादने तदपेक्षाभावात्प्रमाणं स्यात्। तथानुमानस्य प्रामाण्यं स्यात्॥ तद
पि नियमग्रहणमपेक्षते तेन च गृहीतमर्थमात्रयाप्यधिकं गृह्णातीति भवतां दर्शने। पीतशंखज्ञानमप्यनुभूतित्वात्प्रमाणं स्यात्
इष्टमेवेति वदतो लोकविरोधः। तस्माद्यथार्थमगृहीतग्राहि ज्ञानं प्रमाणमिति वक्तव्यं। धारावाहिकेष्वप्युत्तरोत्तरेषां कालान्तरसं
बंधस्याग्रहीतस्य ग्रहणाद्युक्तं प्रामाण्यं। सन्नपि कालभेदोतिसूक्ष्मत्वान्न परामृश्यत इति चेत्। अहो सूक्ष्मदर्शी देवानां प्रियः। यो
हि समानविषयया विज्ञानधारया चिरमवस्थायोत्तरतः सोनंतरक्षणसंबंधितयार्थं स्मरति किमत्र घटोवस्थित इति पृष्टः कथयति त्रिक्ष
णान्तरामयोपलब्ध इति तथा प्रातरारभ्यैतावत्कालं मयोपलब्ध इति। कालभेदे त्वगृहीते कथमेवं वदेत्॥ तस्मादस्ति कालभेदप
रामर्शः। तदाधिक्याच्च सिद्धमुत्तरेषां प्रामाण्यं। नन्वयथार्थतापि वेत्प्रमाणलक्षणं उष्ट्रजलज्ञानमप्रमाणं स्यात्॥ इष्टमेवेति चेन्न
नु लोके विरोधः स्यात्। स्यादयथार्थं तं जानंत एव लौकिकाः प्रमाणमव्यवहरन्ते न त्वयथार्थतामेव तस्य मन्यमानाः। प्रामाण्यमन्य
ते। ये त्वयथार्थतां जानंति तैर्नैव प्रामाण्यमभ्युपेतं नाप्यभ्यातता। तस्मान्नास्ति लोकविरोधः। पीतशंखज्ञानस्यापि स्मृतित्वाभिमान। राम १७
स्त्वनुभूतित्वापरिज्ञानादप्रामाण्यमन्यते। अतोस्माकमपि नास्ति लोकविरोध इति चेत्। तदयुक्तं। न हि लौकिकाः शुक्तिरजतज्ञानेपि स्मृति

17

तेंमन्यतेनन्नरांपीतशंखवत्ताने॥ तस्मात्सूक्ष्ममर्थमनुपलब्ध इति॥ वृत्तिकारस्त्वन्यथेदं वर्णयांचकारेत्येवमादिनो
पवर्षमतेन तस्य निमित्तपरीष्टिरित्येवमादि सूत्रत्रयमष्टधा कृत्वा व्याचष्टे भाष्यकारः। तत्र निमित्तसूत्रेण त
वत्प्रतिज्ञातस्य चोदनाप्रामाण्यपरीक्षापदेशेन स्वतःप्रामाण्यं हेतुरुच्यते। प्रसिद्धानि हि प्रत्यक्षादीनि प्रमा
णानि। तदंतर्गतं च शब्दं। ततस्तदपि प्रसिद्धमेव॥ न च प्रसिद्धस्य प्रमाणस्य प्रामाण्यमन्येन परीक्षितव्यं॥
स्वत एव तस्य स्वविषयोपस्थापनसामर्थ्यात्॥ यदि न परीक्ष्येत ततो येन परीक्ष्येत तस्याप्यन्येन तस्याप्यन्ये
नेत्यनवस्था स्यात्। तस्मात्प्रसिद्धत्वात्प्रामाण्यस्य चोदनापि प्रमाणमिति। ननु न ज्ञानमुत्पन्नमित्येवार्थ
तथात्वमध्यवसातुं शक्यं। प्रसिद्धतरस्यापि प्रत्यक्षस्यायथार्थस्योत्पत्तिदर्शनात्। यथा शुक्तिकायां रजतमि
ति मिथ्या प्रत्यक्षमेवायथार्थं। न शुक्तिकायां रजतज्ञानस्य प्रत्यक्षाभासत्वात्॥ किं पुनराभासासंकीर्णं प्रत्यक्ष
णं न दर्शयति। सत्संप्रयोगे पुरुषस्येंद्रियाणां बुद्धिजन्म तत्प्रत्यक्षं। यदाभासं विज्ञानं तेनेंद्रिया

शा॰प्र॰ १८ एणांसंप्रयोगेयज्ज्ञानंतत्सत्प्रत्यक्षं।तत्सतोर्व्यत्ययादाभासासंकरसिद्धिः।तदितिवाव्ययंतृतीयांतंते
नेत्यर्थः।नच सत्यपिव्यत्ययेनासिसंकरः।इन्द्रियसंप्रयोगजंज्ञानंप्रत्यक्षमित्येतावदेववक्तव्यं।न
हिशुक्तिकायांरजतज्ञानमिंद्रियसंप्रयोगजं किंतर्हीन्द्रियसंप्रयोगाच्छुक्तिशकलंरजतसा
धारणभास्वरत्वादिरूपेणगृहीतमसाधारणंतुशुक्तिकात्वमिंद्रियदोषवैल्यादगृहीतम
नंतरंचसंस्कारोद्बोधाद्रजतंस्मृतं।ततःस्मृतरजतात्मनाशुक्तिव्यक्तिर्दोषवशाद्गृह्यते·
ततोनेन्द्रियसंयोगाज्जंरजतज्ञानमितिनातिप्रसंगः।भ्रमाणामस्तीन्द्रियसंयोगजत्वमि
तितद्व्यावृत्त्यर्थंतत्संयोगजमितिविशेषणंवक्तव्यमितिचेन्न।तत्र।नहिह्यथाक राम
थंचित्संयोगजत्वंलक्षणं।किंतुसाक्षाज्जन्यत्वं।यदियथाकथंचिदित्याश्रीयेतत १८

18

नोविशेषणेसत्यपिअनिव्याप्तेर्लक्षणंस्यात्। आरादग्निमध्यमानयतो यदौष्ण्याविष
यमनुमानंतदपिप्रत्यक्षंस्यात्। प्राणास्त्विंद्रियसंयोगजत्वात्संप्रयुक्तविषयत्वाच्च॥ अस
द्वस्तिघोष्यस्येंद्रियसंप्रयोगःसंयुक्तसमवायघलक्षणः। तस्मादवश्यंसाक्षात्संप्रयोग
जत्ववक्षणमित्यंगीकर्त्तव्यं। अतःशुक्तिरजतवेदनेव्यभिचाराभावादनर्थकस्तत्सत्संनोर्व्यस्यघः
।सत्संसात्संप्रयोगजत्वंलल। क्षणंसत्यपिशुक्तिरजतज्ञानेनातिप्रसंगःपीतशंखद्विचंद्रादि
ज्ञानेष्वव्यतिव्याप्तिःस्यात्साक्षात्संप्रयोगजत्वात्। अपिच॥ स्मृतेनरजताकारेणय। तं।ति
तस्यशुक्तिशकलस्यतादात्म्याग्रहणात्तदनुपरतइंद्रियव्यापारस्यभवत्संप्रत्यात्संप्रयोगमेवापरे
क्षत्वात्॥ तस्माद्राभासनिवृत्त्यर्थस्तत्सत्तोर्व्यन्ययइतिसूक्तं। भाष्येत्वाभासप्रदर्शनार्थंशुक्तिका
जतज्ञानोदाहरणमित्यनवद्यं। कथंतत्संप्रयोगजत्वानत्संप्रयोगजत्वेविविच्येते। उच्यतेज्ञानस्वर
सादेवविषयस्यतथात्वमध्यवसीयते। तदन्यथात्वंतुकारणदोषज्ञानादर्थान्यथात्वज्ञानाद्वावगंतव्यम्

शा॰प्र॰ १९ नोपत्रप्रयत्नेन।स्विप्नप्रमाणेपिकारणदोषोवाधकज्ञानंवानोपलभ्यतेतेनतत्प्रमाणमितरच्चाप्रमाणं।चोद्या
र्थज्ञानस्यात्तत्तयाभावात्सिद्धंप्रमाणं॥ननुसर्वएवनिरालंवनश्च्यादिनाशर्वाह्नेहेतुद्वयनिमित्तंमिथ्यात्वा
क्षेपणाश्रून्यवादीप्रत्यवतिष्ठते।तथाहियत्रकारणदोषज्ञानंवाधकज्ञानंवातत्रमिथ्यात्वमन्यत्रसत्यत्व
मितिव्यवस्थानोपपद्यतेसर्वज्ञानानांमिथ्यात्वात्।सर्वमेवहिज्ञानमनाद्यंशपर्यवसितमनादिवासनाव
शादात्मानमेववाह्यतयाध्यवस्यन्मिथ्यैव।कथंपुनरात्मंश्यशायर्यवसायित्वंगम्यते।अनुमानात्।वाह्यत्वप्र
त्ययस।मर्थ्यात्यथाचासामर्थ्यंतथावक्ष्यामः।अप्रत्यनुमानमुच्यते।स्तंभादिप्रत्ययाःस्वांशमेववाह्यतया
ध्यवस्यतोमिथ्याभूताःप्रत्ययत्वात्स्वप्नप्रत्ययवत्।शुक्तिकारजतादिप्रत्ययवच्च।स्वप्नादिप्रत्ययाहिय
थावगम्यमानवाह्यार्थाभावाद्देशान्तरकालान्तरवर्तिनांचासंनिहितदेशकालतयाप्रतिभासा
संभवात्क्वचिदप्यसंभवतांस्वशिरश्छेदादीनांस्वप्नेप्रतिभासात्स्वरूपस्वात्मानमेवचाहितर्वद्भवती
त्यभ्युपगंतव्यं।अतस्तत्सामान्यात्जाग्रद्ज्ञानानामपिस्वांशपर्यवसायित्वान्मिथ्यात्वमितिप्राप्ते राम १९
भिधीयते।नतावत्स्वप्नादिप्रत्ययाःस्वांशालंबनाःतेपिवाह्यार्थमन्यथाग्टह्णंतीतिवक्ष्यामः॥भ

19